एव. All except D. have च after तेन. F. निवेदयम्. B. om. इति. F. om. च before राज्ञा. All except G. om. च before & C. E. F. put it after मुनिना.

12. C. E. F. ततः किम्.

13. G. तत् for ततः. A. om. तत्. G. °युग्मम्. A. B. लङ्केश. A. निकषाया (?) & om. एव. A. B. मत्वा. C. D. E. F. आहरणप्रेरणाय. A. om. पूर्वमेव & च नूनम्. A. B. आहरणाय. B. प्रति प्रहितोऽस्मि.

15. A. B. D. °करी for °वती & भूमौ for लोके. A बहुतरः प्रणिधिमान्.

16. A. om this speech. C. E. om. तत्. B. inserts कथय before कथम्.

17 तापसः । आकर्णितं हि मया मिथिलामागतो लङ्केश्वर इति । अतस्तद्विलोकनाय प्रथममिहागतः । अधुना च ताटकावनं यास्यामि । तत्कथय तावद्भवान्पुनः कतरः ।

18 भिक्षुः । अहमपि स एव ताटकां प्रति प्रहितः । मिथिलोपवनागमनकारणं समानमावयोः ।

19 तापसः । तत्किं सताटङ्कमधुना ताटकावनम् ।

20 भिक्षुः । सताटकमिति तावत्पृच्छ ।

21 तापसः । क्व पुनः संप्रति ताटका ।

22 भिक्षुः । पुरीं प्रविष्टा ।

23 तापसः । तत्किं दशरथस्य ।

24 भिक्षुः । नहि नहि अन्तकस्य ।

25 तापसः । केन पुनः प्रतिहारायितमन्तकपुरीप्रवेशे तस्याः ।

26 भिक्षुः । रामबाणेनैव ।

27 तापसः । क एष रामः । विमृश्य । नूनं स एव यः खलु दशरथकुमारयोरग्रजः । तत्कथय क्व पुनरधुना ताटकातनयौ ।

---

17. A. om. तापसः. A. च for हि which B. D. om. A. B. put लङ्केश्वरः before मि ... तः. C. E. F. रावण for लङ्केश्वर. A. B. om. च after अधुना. C. E. F. put तत् in place of तावत् which B. om. A. भगवान्. B. D. om. पुनः. C. E. F. कतरः पुनः.

18. A. B. माल्यवता before प्रहितः. C. F. ° वने. B. समम्.

19. B. G. add सहर्षम् । तत्कथय तावत् before तत्किम् &c. C. D. E. F. कथय for किम्.

21. B. सातङ्कम्. F. संप्रति पुनः.

23. B. om. तत्.

24. A. om. one नहि.

25. F. om. तापसः. C. E. F. add संप्रति after पुनः.

26. A. B. om. एव.

27. A. B. D. om. नूनम्. B. om. यः.

28 भिक्षुः । सुबाहुस्तावत्ताटकामेवानुगतः । मारीचोऽपि शिशुक्रीडोचित-रामनाराचपीडितो जीवन्मृत एव दूरं क्षिप्तः ।

29 तापसः । तत्कथं केनापीदं न कथितं लङ्केश्वरस्य ।

30 भिक्षुः । कथितमेवेदमाक्रन्दता मारीचेन ।

31 तापसः । तत्कथं न कुपितो लङ्केश्वरः ।

32 भिक्षुः । सीताभिलाषशीतले लङ्केश्वरचेतसि नारूढ एव कोपपरितापः ।

33 तापसः । क्व पुनरधुना रामलक्ष्मणौ ।

34 भिक्षुः । श्रुतं मया कौशिकानुपदं तदाश्रमान्मिथिलां प्रति प्रचलिताविति । विलोक्य सत्रासम् । कथमिमौ तावित एवाभिवर्तेते । तदस्य निशाचरवैरिणो रामस्य पुरतः स्थातुमनुचितमावयोः ।

इति निष्क्रान्तौ ।

विष्कम्भकः ।

ततः प्रविशतो रामलक्ष्मणौ ।

35 रामः । वत्स लक्ष्मण पश्य पश्यारामरामणीयकम् ।

36 लक्ष्मणः । आर्य निसर्गरमणीयोऽयमारामः । अधुना तु मधुमासावतारेण नितान्तरमणीयः ।

---

28. A. B. om. तावत्. A. अनुयातः & om. राम. A. B. D. G. मुक्त for मृत. B. G. इव for एव.

29. A. B. G. तत्किं (G. कथ) मिदानीं (G. न) कथितं केनापि लङ्केश्वरस्य. D. तत्कथितमिदानीं न केनापि लङ्केश्वरस्य.

30. A. एवम् for एव. C. E. add after एव, लङ्केश्वरस्य & F. °राय. C. D. E. F. G. किल before इदम्.

31. A. B. किम् for कथम्. A. om. न. G. कुपितो न.

32. B. C. E. F. अधिरूढ.

33. A. तौ after अधुना.

34. C. E. F. आश्रमपदात्. C. E. F. om. प्रति. B. D. om. प्र before चलितौ. B. om. इति.

35. D. om. one पश्य. C. रमणीयकम्. G. रामणीकम्.

36. A. अयम् for आर्य. D. स्वर्ग for निसर्ग. A. B. निसर्गादेव. D. om. अधुना ... रमणीयः. A. °रमणीयम्.

37 रामः । सहर्षम् । कथमवतीर्णैव वसन्तमासलक्ष्मीः । विमृश्य । एवमेतत् । तथाहि

इह मधुपवधूनां पीतमल्लीमधूनां
विलसति कमनीयः काकलीसंप्रदायः ।
इह नटति सलीलं मञ्जरी वञ्जुलस्य
प्रतिपदमुपदिष्टा दक्षिणेनानिलेन ॥ ३ ॥

अपि च ।

मलयशिखरादाकैलासं मनोभवशासना-
द्भुवनवलयं जेतुं वाञ्छन्वसन्तसमीरणः ।
विहितवसतिं कैलासाग्रे भुजङ्गधरं हरं
मनसि विमृशन्भीतः शङ्के प्रयाति शनैः शनैः ॥ ४ ॥

38 लक्ष्मणः । आर्य अहं त्वेवं तर्कयामि ।

पथि पथि लतालोलाक्षीभिः स्रवन्मधुसीकरं
कुसुमनिकरं वर्षन्तीभिः सहर्षमिवार्चितः ।
मधुकरवधूगीतासक्तं कुरङ्गकमास्थितः
प्रसरति वने मन्दं मन्दं वसन्तसमीरणः ॥ ५ ॥

39 रामः । वत्स अलमनेन । तद्यावदयं भगवान्विश्वामित्रस्तत्रभवतो याज्ञवल्क्यस्य समागमसुखमनुभवति तावत्तदीयसायंतनदेवतार्चनोचितानि कुसुमान्यवचीयन्ताम् ।

40 लक्ष्मणः । बाढम् । इति लताविटपान्तरितः कुसुमावचयं नाटयति ।

---

37. A. B. °शीर्णः & °मासः. A. G. मधु for वसन्त. A. om. एवमेतत्; & वल्ली for मल्ली. C. E. F. विसरति रमणीयः. D. विसरित (?) कमनीयः. A has not °ति कमनीयः काक°. A. B. वाञ्छन् जेतुम्. A. has not °सतिम्.

38. D. om. त्वेवम्.

39. A. °चित° & °चीयताम्.

41 रामः। विलोक्य। कथमिदमितश्चण्डिकायतनम्। अञ्जलिं बद्ध्वा।

मातः करुणतरङ्गिणि विकसन्नयनामृतोर्मिसीकरिणि।
तरुणतुहिनकरचूडामणिरमणि त्वां नमस्यामि॥ ६॥

पुनरन्यतो विलोक्य। अये इयमसौ मदकलकलहंसोत्तंसितसितसरोजराजिराजिता सरसी सरसीकरोति मे चेतः। पुनः सकौतुकम्। अये कथमयं नलिनीवनविहारिणीं सहचरीमपि विहाय कलहंसपोतश्चूतविटपान्तरालमनुसरति। कर्णं दत्त्वा। अये क एष मदकलकरिकनकशृङ्खलामणिरणितानुकारी कोऽपि कलकलः समुल्लसति। विमृश्य। नूनं राजहंसासिञ्जितहारि मञ्जीरगुञ्जितमेतत्। तदवश्यमिह सलीलचलच्चरणरणन्मणिनूपुरया पुराङ्गनया कयाचन चण्डिकायतनमागच्छन्त्या भवितव्यम्। तदलमस्माकमितोऽवलोकनेन। परस्त्रीति शङ्कापि संकोचाय रघूणाम्।

42 नेपथ्ये। भर्तृदारिके इत इतः।

43 रामः। कथमियं राजकुमारिका। तदालोकयामि तावत्। विलोक्य सहर्षकौतुकम्।

केयं श्यामोपलविरचितोल्लिखद्धेमकरेखा-
लग्नैरङ्गैः कनककदलीकन्दलीगर्भगौरैः।

41. A. om. विलोक्य. D. om. अन्यतः. C, D. E. F. अवलोक्य. C. E. F. कथम् after अये. D. इदम् for इयम्. B. om. मे. A. B. om. अयम्. A. नलिन om. अपि, & कलकलः कोऽपि. F. ननु for नूनम्. A. D. om. सिञ्जित. A. मञ्जु for मञ्जीर. F. रञ्जित for गुञ्जित. A. चल° & om. मणि. A. B. D. put पुराङ्गनया before भवितव्यम्. A. B. om. कया चन. C. E. कयाचित्. A. B. D. om. इति after स्त्री.

43. D. हैम & पूरैः for गौरैः.

हारिद्राम्बुद्रवसहचरं कान्तिपूरं वमद्भिः
कामक्रीडाभवनवलभीदीपिकेवाविरास्ति ॥ ७ ॥

ततः प्रविशति सीता सखी च ।

44 सीता । हला पेक्ख पेक्ख । अज्ज इममुज्जाणं वसन्दसहअरेण सअं जेव्व मम्महेणालङ्किदं विअ अतिमेत्तरमणिज्जं पडिहादि ।

45 सखी । अनवद्याङ्गि एवमेतत् ।

46 रामः । अये सर्वानवद्याङ्गीति वक्तव्यम् । नन्वस्याः

बन्धूकबन्धुरधरः सितकेतकाभं
चक्षुर्मधूककलिकामधुरः कपोलः ।
दन्तावलीविजितदाडिमबीजराजि-
रास्यं पुनर्विकचपङ्कजदत्तदास्यम् ॥ ८ ॥

पुनर्निर्वर्ण्य । अहो मुग्धाया अप्यस्याः प्रकृतिकमनीयपदार्थपरिशीलनौचित्यचातुरी । तथा हीयं हि

पदाभ्यामुन्निद्रामधरयति शोणाम्बुजरुचिं
कराभ्यामादत्ते नवकिसलयानामरुणताम् ।
प्रवालस्य च्छायां दशनवसनाग्रेण पिबति
स्मितज्योत्स्नापूरैरुपहसति कान्तिं हिमरुचेः ॥ ९ ॥

---

44 हला प्रेक्षस्व प्रेक्षस्व । अयेदमुद्यानं वसन्तसहचरेण स्वयमेव मन्मथेनालङ्कृतमिवातिमात्ररमणीयं प्रतिभाति ।

A. G. वहद्भिः for वमद्भिः. D. कदली for वलभी. F. आस्ते for अस्ति.

44. C. E. F. उज्जाणअम्. B. om. सअम्. All except D. G. om. जेव्व.

46. B. om. अये. A. कैतक. C. E. F. मधुर & D. रमणीय for कमनीय. A. om. इयं हि & has पदाल्पा (?). B. भारैः for पूरैः. A. D. हिमरुचः,

47 सखी । भर्तृदारिके इदं तच्चण्डिकायतनम् ।

48 सीता । अञ्जलिं बध्द्वा । देवि ससहरमौळिदेहद्धवासिणि तिहुअणवरसुआसिणि णमो दे ।

49 सखी । विहस्य । समुचितैव प्रणामपरिपाटी ।

50 सीता । सप्रणयकोपम् । अळमळीअजप्पिदेण ।

51 सखी । अञ्जलिं बध्द्वा ।

कान्तमिन्दुमणिदामकोमळे
कोमळेन्दुमुकुटाङ्कशायिनि ।
इन्दुचारुमचिरेण विन्दता-
मिन्दुसुन्दरमुखी सखी मम ॥ १० ॥

52 रामः । अये कथमस्याः परिणयमनोरथप्रणयी सखीजनः । विमृश्य । उचितमेवैतत् । वयःसन्धौ खल्वियं वर्तते । तथा हि

अपक्रान्ते बाल्ये तरुणिमनि चागन्तुमनसि
प्रयाते मुग्धत्वे चतुरिमणि चाश्लेषरसिके ।
न केनापि स्पृष्टं यदिह वयसा मर्म परमं
तदेतत्पक्ष्मेषोर्जयति वपुरिन्दीवरदृशः ॥ ११ ॥

53 सखी । अयि देवि सत्वरं पूरय मे मनोरथं यावदियं न दुर्मनायते सखी ।

---

48 देवि शशधरमौलिदेहार्धवासिनि त्रिभुवनवरसुवासिनि नमस्ते ।
50 अलमलीकजल्पितेन ।

---

48. A. अयि before देवि. A. सततम् for सस & om. मौलि for which B. has मुकुट. D. G. °धारिणि for वासिनि. C. E. F. वर for पर. G. repeats णमो.

49. G. om. विहस्य.

52. A. B. D. G. om. एव. A. स्पष्टम्. B. तदिह for यदिह.

53. F. अये for अयि. D. G. मे पूरय. A. B. put मे after इयम्.

54 सीता । सप्रणयकोपम् । किंति दुम्मणायिस्सम् ।

55 लक्ष्मणः । अयि राजहंसकन्यके किमिति दुर्मनायसे । अयं ते चूतविटपान्तरितः कान्तः ।

56 सीता । हला कस्स इमो करिकलहकण्ठणिग्घोसमहुरो कण्ठसद्दो सुणीअदि । ता णिरूवम्ह । इति परिक्रामतः ।

57 रामः । सविषादम् । कथमियमन्तरितैव लतया । लतां प्रति ।

स्तनविजितस्तबकश्रीरधराधरितप्रवालनवलक्ष्मीः ।
अयि लतिके तिरयन्ती तरलदृशं नावलम्बसे लज्जाम् ॥ १२ ॥

पुनः सहर्षम् ।

श्यामच्छवीनामियमन्तराले
प्रादुर्भवन्ती कदलीदलानाम् ।
कलेव चान्द्री नवनीरदानां
चकोरवन्मां मुदितं करोति ॥ १३ ॥

पुनः कदलीं प्रति ।

हे बालहेमकदलि भ्रुवमीहसे त्व-
मूरुश्रियं कलयितुं तरलायताक्ष्याः ।
एनां विलम्बय विलासवतीं चिरं हि
स्त्रीणां कलाः परिचिताः स्थिरतां प्रयान्ति ॥ १४ ॥

---

54 किमिति दुर्मनायिष्ये ।
56 हला कस्यायं करिकलभकण्ठनिर्घोषमधुरः कण्ठशब्दः श्रूयते । तन्निरूपयावः ।

---

55. A. B. असौ after अयम्. A. om. ते. B. नूत (?) for चूत.

56. A. om. हला. F. सिणिद्ध° for णिग्घोस. A. परिक्रान्ता. G. om. the direction.

57. A. लव for नव. B. D. E. अपि for अयि. D. लतानाम् for दलानाम्. G. लतिके for कदली.

58 सीता। हला को इमो कणअवण्णो सिहण्डिपिच्छमण्डिदकण्णो मुद्धत्तणविमुक्कलोअणविआरो कुमारो दीसदि। इमं हि पेक्खन्तीए मह णिअवच्छम्मि विअ वच्छलत्तणपच्छालिअं हिअअं वट्टदि।

59 लक्ष्मणः। अये कथमस्यां सुमित्रायामिव सुचरितपवित्रिता मे चित्तवृत्तिः।

60 सीता। हला इमं कुमारं पुलोअन्तीए मह वच्छा उम्मिला चित्तमारुहदि।

61 सखी। विहस्य। नूनमयं कस्यचिद्वत्सशब्दलालनीयो भविष्यति यं विलोकयन्त्या मे त्वमपि चित्तमारोहसि। तत्पृच्छामि तावदेनम्। इति परिक्रम्य। अये राजकुमार कः खलु भवान् यस्त्वमेक एव मुग्धतयापरिशीलितास्वपि वनभूमिषु विहरसि।

---

58 हला कोऽयं कनकवर्णः शिखण्डिपिच्छमण्डितकर्णो मुग्धत्वविमुक्तलोचनविकारः कुमारो दृश्यते। इमं प्रेक्षमाणाया मम निजवत्स इव वत्सलत्वप्रक्षालितं हृदयं वर्तते।

60 हला इमं कुमारं विलोकयन्त्या मे वत्सोर्मिला चित्तमारोहति।

---

58. C. E. F. इमो को. A. B. D. G. °कण्णपूरो. A. विमन्त & B. विभत for विमुक्क. D. लोअपाल for लोअण. C. विस्सारो & E. विप्पारो for विआरो. G. om. हि. All except G. have मह पेक्खन्तीए. E. °वच्च for वच्छम्मि. A वच्छलत्तेण, B. वाच्छल्ल°, C. लच्छत्तण°, E. वच्चलतए, & G. वच्छत्तण for वच्छलत्तण. D. विच्छालिअं & F. पच्छारिअं.

59. All except D. read का for कथम्. B. इयम् for अस्याम्. A. B. D. सुचरित (A. त) पवित्रा. G. सुचिरप्रवृत्ता. B. G. put मे before °सु

61. A. अपि after अयम्. B. G. चित्तवृत्तिम्. A. G. °रोक्ष्यसि. C. D. E. F. om. तत्. F. om. राज. C. adds वीर after भवान्. A. B. किल for त्वम्; & अपरिचितासुराज (B. वन) वीथिकासु for मुग्ध... भूमिषु.°

62 लक्ष्मणः । धिङ् मूर्खे । कथं मामनेन परिसरवार्तिना नाथवन्तमप्येकाकिनमपदिशसि ।

63 सखी । सहर्षम् । कुसुमितस्तावदधुना मे मनोरथद्रुमः ।

64 सीता । हला किमेत्त अह्माणम् । ता एहि । णिअघरं जेव्व वज्जह्म । इति किञ्चित्परिक्रम्य पुनर्व्यावृत्य । हञ्जा एक्कं विसुमरिदं । णं सो सहआरपादओ अवलोअणीओ जस्स वासन्दीलदाए सह सङ्गमं अहिलसन्दि मह अम्बाओ । इत्युभे परिक्रामतः ।

65 रामः । सहर्षम् ।

मन्मनःकुमुदानन्दशरत्पार्वणशर्वरी ।
अहो इयमितो नूनं पुनरप्यभिवर्तते ॥ १५ ॥

निर्वर्ण्य ।

वहत्यस्या दृष्टिर्विकचनवनीलोत्पलतुला-
मखण्डस्याभिख्यां वदनमिदमिन्दोः कलयति ।
कुचौ किंन्मीलत्कमलतुलनां कन्दलयत-
स्तमःशोभां चित्रां चिकुरनिकुरम्बं हि कुरुते ॥ १६ ॥

---

64 हला किमत्रास्माकम् । तदेहि । निजगृहमेव व्रजावः । हला एकं विस्मृतम् । ननु स सहकारपादपोऽवलोकनीयो यस्य वासन्तीलतया सह सङ्गममभिलषन्ति ममाम्बाः ।

---

63. G. तत् for तावत्.

64. B. om. जेव्व. A. वच्चह्म. B. D. F. गच्छह्म. A, B. G. विसुमरिअम्हि. F. वासन्दीए. A. B. समम्. C. E. F. अहिलसदि ... अम्बा. C. D. E. F. om. इति.

65. B. लसत् for शरत्. C. D. E. F. वहतु. A. कलयताम्. C. D. E. F. कलयतु. A. आकलयताम्. D. कवलयताम्. B. C. E. F. कन्दलयताम्. C. D. E. F. चित्रम्. A. तु & D. नु for हि. D. कुरुताम्.

66 सखी। एष सहकारपादपः। इति तदन्तिकमनुसरतः।

67 रामः। कथमिमे मे परिसरमनुसरतः। तत्किंचिदपसरामि तावत्।

68 सीता। सहकारशाखां करेण धृत्वा सकौतुकम्। हला पेक्ख पेक्ख। इमेहिं णहसिहाविलिहिदेहिं कोमलदलेहिं सम्भावीअदि जं किर इअं चूदलदा केणवि विदद्धेण णिअहत्थेण सम्भाविदेति। अह वा णिअचावलदासङ्किदेण सअं मम्महेण एव्व इति।

69 रामः। इत्थं संभावयति भवती। मम पुनरन्यथा वितर्कः।

मत्वा चापं शशिमुखि निजं मुष्टिना पुष्पधन्वा
तन्वीमेतां तव तनुलतां मध्यदेशे बभार।
यस्मादत्र त्रिभुवनवशीकारमुद्रानुकारा-
स्तिस्रो भान्ति त्रिवलिकपटादङ्गुलीसन्धिरेखाः॥ १७॥

70 सखी। भर्तृदारिके इयं वासन्ती लता। इदं च पश्य।

वासन्तीरसबिन्दुं सुन्दरमिन्दिन्दिरा इह पिबन्ति।
चिरमन्दिरमरविन्दं मन्दं मन्दं परिहरन्ति॥ १८॥

71 सीता। तदेव पठति।

---

68 हला प्रेक्षस्व प्रेक्षस्व। एभिर्नखशिखाविलिखितैः कोमलदलैः संभाव्यते यत्कि-लेयं चूतलता केनापि विदग्धेन निजहस्तेन संभावितेति। अथ वा निजचापल-ताशङ्कितेन स्वयं मन्मथेनैवेति।

---

66. A. B. add सः before एषः. C. E. F. put एषः after °पादप. G. adds इयं च वासन्तीलता after पादप. A. om. इति. D. अन्तिके. C. E. उप° for अनु°.

67. A. °सरामि किञ्चित्.

68. G. सखी for सीता. All except A. have करे. C. om. one पेक्ख. E. इअंहि for इमेहिं. A. विहाण्डिदेहि. A. om. त्ति.

69. E. G. एनाम्. A. D. दधार.

70. B. सा after इयम्. D. इमम्. A. D. चरन्ति. B. संचरन्ति.

71. D. om. सीता & puts तदेव पठति in the mouth of Ráma. A. B. वासन्तीरसबिन्दुमिति after पठति.

72 रामः । किमिदानीं लतान्तरवर्णनया । नन्वियमेव

निर्मुक्तशैशवदशा शिशिरा नवीन-
संप्राप्तयौवनवसन्तमनोरमश्रीः ।
उन्मीलितस्तननवस्तबका निकाम-
मेणीदृशस्तनुलता तनुते मुदं नः ॥ १९ ॥

73 सखी । भर्तृदारिके पश्य पश्य । इयमसौ वासन्ती लता स्वयमेव सहकारपोतमालिङ्गितुं पुरः सरति ।

74 सीता । सप्रणयकोपम् । अए अलीअजप्पिणि दाणिं तुह परिसरं परिहरिअ अण्णदो गमिस्सम् ।

75 रामः ।

अमलमृणालकाण्डकमनीयकपोलरुच-
स्तरलसलीलनीलनलिनप्रतिफुल्लदृशः ।
विकसदशोकशोणकरकान्तिभृतः सुतनो-
र्मदललितानि हन्त ललितानि हरन्ति मनः ॥ २० ॥

76 सीता । विलोक्य सकौतुकम् । अम्मो

विसट्टपेसलुप्पलप्पलासपुञ्जसामलो
महेससोम्मसेहरप्फुरन्तसोमओमलो ।

---

74 अयि अलीकजल्पिनि इदानीं तव परिसरं परिहृत्यान्यतो गमिष्यामि ।

76 अहो

विकसितपेशलोत्पलपलाशपुञ्जश्यामलो
महेशसौम्यशेखरस्फुरत्सोमकोमलः ।

---

72. C. E. F. आः before किम्.

73. D. G. om. one पश्य. A. सहकारक.

74. B. अलमलीअजप्पिरेण. D. om. दाणिम्.

75. A. B. G. °रुचेः. B. नलिनी. A. B. पल्लवसदृशः. A. अरविन्दकोश for वि…शोक. D. तर for कर.

76. A. E. विसद्द, C. विसट्ट, & D. विकसिअ. A. पूग & B. D. G.

लतावरम्मि को इमो अणङ्गरूवखण्डणो
विलोअणाण देइ मे सुहं सिहण्डमण्डणो ॥ २१ ॥

77 सखी । भर्तृदारिके कथय कथं लतालोकनकौतुकाद्विरतासि ।

78 सीता । अनाकर्णितकेन । तदेव पञ्चमस्वरेण पठति ।

79 सखी । उपसृत्य । कथमियमन्यचित्तेव लक्ष्यते । क्व पुनश्चित्तमस्याः । रामं दृष्ट्वा साकूतम् । अये इदमस्याश्चित्तगन्धगजबन्धनालानम् । पुनः सीतां हस्ते धृत्वा । भर्तृदारिके प्रणयमधुरोऽपि सखीजनः किमवधीर्यते । अथवोचितमिदम् । अधुना हि तवायं हृदयमधिवसति ।

80 सीता । स्वगतम् । कहं अवगदम्हि इमाए । इति लज्जां नाटयति ।

81 सखी । स्वगतम् । कथमियं लज्जते । तदन्यतो नयामि । प्रकाशम् । कथमद्यापि हृदयं न मुञ्चति ते प्रणयकोपः ।

लतागृहे कोऽयमनङ्गरूपखण्डनो
विलोचनयोर्ददाति मे सुखं शिखण्डमण्डनः ॥

80 कथमवगतास्म्यनया ।

पुञ्छ for पुञ्ज. D. अण्डणो (?) for खण्डणो. A. B. विलोअणेण. D. विलोलअणाणं. E. विलोअणाइ. F. विलोअणाअणन्दो. D. F. सिहि for सुहम्. B. सिहण्डि.

77. D. om. भर्तृदारिके. C. D. E. F. om. कथय. A. अवलोकन & B. C. E. विलोकन. G. om. कौतुक.

78. A. B. एव after अनाकर्णितकेन. A. om. तदेव for which D. has तमेव. A. पञ्चचामरम्. B. पुनः सादरम्. D. G. पञ्चमस्वरम्. F. °स्वरेण.

79. F. om. कथम्. B. D. G. om. गन्ध. A. om. हि.

81. D. om. कथमियं लज्जते & also हृदयम् which A. puts after मुञ्चति.

82 सीता । स्वगतम् । कोवमुद्दिसिअ इमाए भणिदं ण उण इमम् । प्रकाशम् । हला कहं तुह कुविस्सं । केवलमण्णचित्तदाए ण संभाविदासि ।

83 सखी । भर्तृदारिके क तर्हि दत्तचित्तासि ।

84 सीता । आरामम्मि ।

85 सखी । विहस्य । अहो ते चातुर्यं यत आरामप्रकटनेनैवाकारगुप्तिं कृतवत्यसि ।

86 सीता । सलज्जमधोमुखी तिष्ठति ।

87 रामः ।

उत्तरङ्गय कुरङ्गलोचने
लोचने कमलगर्वमोचने ।
अस्तु सुन्दरि कलिन्दनन्दिनी-
वीचिडम्बरगभीरमम्बरम् ॥ २२ ॥

88 सखी । सप्रणयस्मितम् । भर्तृदारिके अलमलमालिजनेऽपि हृदयापलापेन । ननु विदितं मया ।

अत्र ते सखि शिखण्डमण्डने
पुण्डरीककमनीयलोचने ।

---

82 कोपमुद्दिश्यानया भणितं न पुनरिमम् । हला कथं तुभ्यं कोपिष्यामि । केवलमन्यचित्ततया न संभावितासि ।

84 आरामे ।

---

82. A. विकुविस्सम्. F. मए. D. om. सि.
83. G. om. भर्तृदारिके.
85. A. B. F. यत् for यतः. G. आकार for आराम. D. प्रकटवती.
87. D. सखी for राम. C. F. हरिण for कमल.
88. D. om. सखी. D. G. have

श्यामतामरसदामकोमले
रामनामनि मनो मनोभवे ॥ २३ ॥

89 सीता। हला पेक्ख पेक्ख।

मअणवहूणेउररवरमणिज्जं किम्पि किम्पि कूजन्तो।
माअन्दमुउलमहुरसमहुरमुहो महुअरो भमइ ॥ २४ ॥

स्वगतम्।

अयि पिबह लोअणाइं पिअजणवअणारविन्दमअरन्दम्।
अयि तरलाइ विआरह उण कह तुम्हे कह इमो अ ॥ २५ ॥

इति रामं नयनाञ्चलेन सलीलमालोकते।

90 रामः। निर्वर्ण्य।

सर्वस्वं नवयौवनस्य भवनं भोगस्य भाग्यं दृशोः
सौभाग्यं मदविभ्रमस्य जगतः सारं फलं जन्मनः।
आकूतं कुसुमायुधस्य हृदयं रागस्य तत्त्वं रतेः
शृङ्गारस्य रहस्यमुत्पलदृशस्तत्किंचिदालोकितम् ॥ २६ ॥

---

89 हला प्रेक्षस्व प्रेक्षस्व।

मदनवधूनूपुरवरमणीयं किमपि किमपि कूजन्।
माकन्दमुकुलमधुरसमधुरमुखो मधुकरो भ्रमति ॥
अयि पिबतं लोचने प्रियजनवदनारविन्दमकरन्दम्।
अयि तरले विचारयतं पुनः क युवां कायं च ॥

---

one अलम्. B. om. अपि. A. B. D. G. रमणीय for कमनीय.

89. G. puts पुनः स्वगतम् before मअण &c. A. D. have one किम्पि. G. om. °समहुर°. A. B. D. पुनः before स्वगतम्. D. पिबह (?) for पिबइ & अपि for अयि. B. पुण. A. कहम् ...कहम्. B. आलोकयते. D. आलोकति. C. E. F. अवलोक (C. य) ते.

90. A. दृशः. D.G. दृशाम्. G. साकूतम्. B. D.G. रामस्य for रागस्य.

91 सीता । स्वगतम् । पुनस्तामेव गाथां पठति ।

92 सखी । अयि भर्तृदारिके पश्य पश्य ।

दलदमलकोमलोत्पलपलाशशङ्काकुलोऽयमलिपोतः ।
तव लोचनयोरनयोः परिसरमनुवेलमनुसरति ॥ २७ ॥

93 सीता । सहर्षमात्मगतम् । सहि लोअणाणुबन्धाणुबद्धावि णं सुहोपसुदी इअम् । पुना राममालोकते ।

94 रामः । समत्याशम् ।

अमृतमयपयोधिक्षीरकल्लोललोलैः
स्नपयति तरलाक्षी यत्र मां नेत्रपातैः ।
अपि भवति सदायं सन्मुहूर्तः

विमृश्य सविषादम् ।

कुतो वा
मधुरविधुरमिश्राः सृष्टयो हा विधातुः ॥ २८ ॥

95 प्रविश्य चेटी । भट्टिदारिए भट्टिणीहिं आणत्तम्हि । जं किर वच्छा जाणई झत्ति घरं आणीअ विचित्ताहरणेहिं मण्डीअदु । जेण ताए साणन्दं वअणारविन्दं पुलोवेम्ह ।

---

93 सखि लोचनानुबन्धानुबद्धापि ननु सुखोपश्रुतिरियम् ।

95 भर्तृदारिके भट्टिनीभिराज्ञप्तास्मि । यत्किल वत्सा जानकी झटिति गृहमानीय विचित्राभरणैर्मण्ड्यताम् । येन तस्याः सानन्दं वदनारविन्दं विलोकयामः ।

---

91. D. तदेव for ता...गाथाम्.
92. D. om. अयि. G. om. one पश्य. A. चस्पलपेशल for कोमलोत्पल.
93. F. स्वगतम्. All except D. have अयि for सहि ; & लोअणाइं after which A. has बद्धवियद्वाणे सुहावअस्सुदिरियम्. B. वदइ सुहोप°. C. E. F. बद्धाविअद्वाणं सुहोपसुदीयं (F. ° सप्पदि), & G. बद्धसप्पदाइं ण सुहोप°. A. G. om. पुनः &c., & B. अवलोकयते.
94. B. G. भवतु.
95. B. repeats चेटी. A. जत्त सा जाणई अत्थि सत्तुघरम् for वच्छा... घरम्. D. चित्ता°. A. मण्डीअइ.

96 सीता । हञ्जे कधं सिणेहमुद्धाओ मह अम्बाओ ।

97 चेटी । कहं ण मुद्धाओ जा तुमं णिसग्गलावण्णचन्दलेहां णेवच्छलच्छीलञ्छणेणालंकिदुं इच्छन्दि । तहा अ

अयि तुह मुहलेहा चन्दबिम्बे सणेहा
दसणकिरणलच्छी अच्छजोह्णासरिच्छी ।
कुवलयदलदोणीकन्दराए वहन्ती
तरलबहलमिट्ठी दुद्धधारेव दिट्ठी ॥ २९ ॥

ता आअच्छ वच्छे । गच्छम्ह णिअभुअणं एव्व ।

इति निष्क्रान्ताः स्त्रियः ।

---

96 हञ्जे कथं स्नेहमुग्धा ममाम्बाः ।

97 कथं न मुग्धा यास्त्वां निसर्गलावण्यचन्द्रलेखां नेपथ्यलक्ष्मीलाञ्छनेनालङ्कर्तुमिच्छन्ति । तथा च

अयि तव मुखलेखा चन्द्रबिम्बे सस्नेहा
दशनकिरणलक्ष्मीरच्छज्योत्स्नासदृक्षी ।
कुवलयदलद्रोणीकन्दराया वहन्ती
तरलबहलमिष्टा दुग्धधारेव दृष्टिः ॥

तदागच्छ वत्से । गच्छामो निजभुवनमेव ।

---

96. C. om. हञ्जे & वण for सिणेह. E. F. विमुद्धाओ. D. om. मह. After अम्बाओ. B. F. G. read thus :—चेटी । भट्टिदारिए कहं ण (F. अदिसिणेहमुद्धा वि°) मुद्धाओ तुह अम्बाओ । सीता । कहं वण मुद्धाओ मह अम्बाओ.

97. A. B. G. om. कहं ण मुद्धाओ & A. जा also. A. तहा, B. अहवा, & F. तुह अम्बाओ for तहा अ. A. सणाहा. F. omits the 2nd & the 3rd lines ; & has अमल for तरल. A. D. F. मिट्ठा. C. मुद्धधारा. A. om. ता...एव्व. D. G. om. वच्छे. G. घरम्. A. om. स्त्रियः.

98 रामः। सविषादम्। कथं नयनपथमतिक्रान्तैव कान्ता। पुनः सप्रत्याशम्।

अप्याविरस्ति भूयोऽपि मम लोचनयोरियम्।
दिवसेऽन्तर्हिता नक्तं चन्द्रिकेव चकोरयोः ॥ ३० ॥

99 लक्ष्मणः। आर्य इयमाविरस्ति।

100 रामः। सहर्षम्। कथं पुनः प्राप्ता प्रेयसी। विलोक्य। न तावत्। नूनं किमप्यन्यदभिसंधायोक्तमिदं वत्सेन। उच्चैः। वत्स केयमाविरस्ति।

101 लक्ष्मणः।

मुग्धस्य केलिविजितस्मरचापयष्टे-
रातन्वती रुचिमतीव सुधाकरस्य।
रागोद्धुरा स्फुटमुदञ्चिततारकश्रीः
सन्ध्याविरस्ति ननु कापि पतिंवरेव ॥ ३१ ॥

102 रामः। एवमेतत्। तथा हि

कृत्वा प्रबुद्धकमलामखिलां त्रिलोकी-
मम्भोनिधेर्विशति गर्भमसाविदानीम्।
अन्तःप्रसुप्तहरिनाभिसरोजबोध-
कौतूहलीव भगवानरविन्दबन्धुः ॥ ३२ ॥

---

98. A. B. नेत्रमार्गम्. D. F. इव for एव. A. B. om. कान्ता. B. D. अथ for अपि. G. अस्तु. A. B. दिवसान्तर्हि (B. रि) ता.

100. सहर्षम्. A. om. न तावत्. A. B. D. G. तदिदम् before उक्तम्. C. E. om. इदम्.

101. A. कोटि for केलि & अस्तु.

102. G. adds वत्स before एवम्. A. om. तथा हि ; & अत्र for अन्तः.

103 लक्ष्मणः। आर्य दृश्यतामयमीषन्मुकुलितराग इव गगनाभोगः।

104 रामः। वत्स एवमेतत्। इदानीं हि

प्राचीमालम्बमाने घनतिमिरचये बान्धवे बन्धकीनां
संप्राप्ते च प्रतीचीं शशिकरनिकरे वैरिणि स्वैरिणीनाम्।
अर्धश्यामोपलार्धस्फटिकमिव दिशामन्तरालं विधत्ते
कालिन्दीजह्नुकन्यामिलदमलजलस्यन्दसन्दोहमैत्रीम्॥ २३॥

पुनः सहर्षमङ्गुल्या दर्शयन्।

एतत्कोककुटुम्बिनीजनमनःशल्यं चकोराङ्गना-
चञ्चूकोटिकपाटयोर्घटितयोरुद्घाटिका कुञ्चिका।
दग्धस्यापि नवाङ्कुरस्मरतरोरार्द्रागसां प्रेयसी-
मानोद्दामगजाङ्कुशो विजयते मुग्धं सुधांशोर्वपुः॥ २४॥

105 लक्ष्मणः।

कल्लोलक्षिप्तपङ्कत्रिपुरहरशिरःस्वःस्रवन्तीमृणालं
कर्पूरक्षोदजालं कुसुमशरवधूसीधुभृङ्गारनालम्।
एतद्दुग्धाब्धिबन्धोर्गगनकमलिनीपत्रपानीयबिन्दो-
रन्तस्तोषं न केषां किशलयति जगन्मण्डनं खण्डमिन्दोः॥२५॥

---

103. F. om. लक्ष्मणः

104. A. B. G. om. वत्स. B. om. एतत्. A. om. इदानीं हि. F. नव for घन. C. D. E. F. किं च प्राप्ते for संप्राप्ते च. A. रवि for शशि. All except D. have उद्घाटिनी. A. D. अभि° for अपि. C. D. E. F. आर्द्रागसि. A. प्रेयसाम्. E. F. प्रेयसि. G. नाल for मान. D. °अङ्कुशम्.

105. A. B. C. E. F. °पङ्कम्. A. बन्धुः, D. बन्धोः, & C. E. F. बन्धुम् for जालम्.

106 रामः। वत्स अलमतिप्रसङ्गेन। तदेहि। सायन्तनत्रिदशार्चनोचितकुसुमोपायनेन भगवन्तं गाधिनन्दनमुपास्वहे।

इति निष्क्रान्ताः सर्वे।

द्वितीयोऽङ्कः।

---

106. D. om. सायन्तन. A. G. उपास्महे. C. D. E. F. उपासीमहि. | G. om. इति before निष्क्रान्ताः.

॥ तृतीयोऽङ्कः ॥

1 ततः प्रविशति वामनकः।

2 वामनकः। आत्मानं विलोक्य सविस्मयम्। अहो अङ्गाणं मे तुङ्गत्तणम्। अवि णाम ईरिसेहिं अङ्गेहिं एत्थ संचरन्तेण मए दुआरसिहरं भज्जीअदि। ता खुज्जो भविअ संचरिस्सम्। इति तथा करोति।

3 प्रविश्य कुब्जकः। वअस्स वामणअ दाणिं सअलगुणसंजुत्तोसि तुमम्।

4 वाम०। कहं विअ।

5 कुब्ज०। पढमं जेव्व वामणो। दाणिं उण खुज्जत्तणं पत्तो।

6 वाम०। सक्रोधम्। अए मुरुक्ख कहं अत्तणो खुज्जत्तणं परस्सिं आरोवेसि। णं तुमं जेव्व खुज्जो। मए उण दुआरसिहरभङ्गसङ्किदेण अप्पाणम्मि खुज्जत्तणं आरोविदम्।

---

2 अहो अङ्गानां मे तुङ्गत्वम्। अपि नामेदृशैरङ्गैरत्र सञ्चरता मया द्वारशिखरं भज्यते। तत्कुब्जो भूत्वा संचरिष्यामि।

3 वयस्य वामनक इदानीं सकलगुणसंयुक्तोऽसि त्वम्।

4 कथमिव।

5 प्रथममेव वामनः। इदानीं पुनः कुब्जत्वं प्राप्तः।

6 अये मूर्ख कथमात्मनः कुब्जत्वं परस्मिन्नारोपयसि। ननु त्वमेव कुब्जः। मया पुनर्द्वारशिखरभङ्गशङ्कितेनात्मनि कुब्जत्वमारोपितम्।

---

1. D. वामनः.

2. A. B. C. E. F. om. वामनकः. C. E. om. अङ्गेहिं. A. जहा संचरिस्सं तेण for एत्थ संचरन्तेण. A. भज्जीअदु; & puts अरम् before खुज्जो. D. G. om. इति before तथा.

3. D. माणवअ for वामणअ.

5. A. खुज्जओ for खुज्ज...पत्तो.

6. B. अरे for अए. B. परस्सिं. & D. परम्मि. B. D. G. खुज्जओ. A. om. सक्रोधम्...खुज्जो.

7 कुब्ज० । विहस्य । कहं विआत्थिमेत्तएण तुह अङ्गेण दुआरासिहरं भज्जिस्सादि । पुनः सक्रोधम् । अरे अलीअवाआल केण तुह कहिदं अहं खुज्ज इति ।

8 वाम० । णं इमिणा जेव्व दरिअवुसहककुदसरिच्छेण पुट्ठट्ठिदेण मंसत्थवएण ।

9 कुब्ज० । विहस्य । अरे मदिसुण कहं इमो मंसत्थवओ । अवि उण सोहग्गलच्छीए उवहाणगेण्डुओ ।

10 वाम० । साशङ्कम् । अरे सणिअं जप्प । अम्हारिसाणं अन्तेउरचराणं सोहग्गवुत्तन्तं आअणिअ भट्टा कुविस्सादि ।

11 कुब्ज० । अलं भीरुत्तणेण । दाणिं उज्झाणवरम्मि वट्टदि भट्टा ।

---

7 कथं वितस्तिमात्रेण तवाङ्गेन द्वारशिखरं भङ्क्ष्यते । अरे अलीकवाचाल केन तव कथितमहं कुब्ज इति ।

8 नन्वनेनैव दृप्तवृषभककुदसदृशेन पृष्ठस्थितेन मांसस्तबकेन ।

9 अरे मतिशून्य कथमयं मांसस्तबकः । अपि पुनः सौभाग्यलक्ष्म्या उपधानगेन्दुकः ।

10 अरे शनैर्जल्प । अस्मादृशानामन्तःपुरचराणां सौभाग्यवृत्तान्तमाकर्ण्य भर्ता कोपिष्यति ।

11 अलं भीरुत्वेन । इदानीमुद्यानगृहे वर्तते भर्ता ।

---

7. B. अरेरे & D. अये for अरे. A. D. om. अहम्.

8. A. om. णं. A. तुह, B. दरिपतवरीसभ, C. E. दरिअवसह, & F. गिरि (which is translated by गिरिसवृषभ,) for our दरिअवुसह. G. °सरिसेण & adds उव्वहिएण at the end.

9. A. B. D. om. विहस्य. G. अए. C. E. F. ईरिसो for इमो & कीलन for उवधान. A. G. °गण्डओ.

10. A. सुणियम् (?). D. जेव्व for जप्प & वासिणम् & G. °चारिणम् for °चराणम्.

11. D. भीतत्तणेण A. om. दाणिम्. A. दाणीं, B. G. धाण, D. न धाण for उज्झाण. A. D. om. वट्टदि.

12 वाम० । णहि णहि । अज्ज किर कस्सवि पाहुणिअस्स महेसिणो आअमणं पडिवालअन्तो बहिर्मण्डवे वट्टदि ।

13 कुब्ज० । ता हदम्ह ।

14 वाम० । किंति ।

15 कुब्ज० । णं पढमं जेव्व एक्केण महेसिणा जण्णवक्केण उवदिट्ठो इमो राआ अच्छिमीलणेहिं रत्तिओ गमावेदि । दाणिं उण इमिणा उवदिट्ठो अन्तेउरं जेव्व परिहारिस्सदि। तदो किमिमो अम्हेहिं खवणोव्व कप्पडपेडएहिं करिस्सदि ।

16 वाम० । सच्चं एदम् । परं इमो महेसी अम्हाणं राइणो उवदेसत्थं ण आअदो । किं उण हरधणुद्दंसणत्थम् ।

---

12 नहि नहि । अद्य किल कस्यापि प्राघुणिकस्य महर्षेरागमनं प्रतिपालयन्बहिर्मण्डपे वर्तते ।

13 तद्धताः स्मः ।

14 किमिति ।

15 ननु प्रथममेवैकेन महर्षिणा याज्ञवल्क्येनोपदिष्टोऽयं राजा अक्षिमीलनै रात्रीर्गमयति । इदानीं पुनरनेनोपदिष्टोऽन्तःपुरमेव परिहरिष्यति । ततः किमयमस्माभिः क्षपणक इव कर्पटपेटकैः करिष्यति ।

16 सत्यमेतत् । परमयं महर्षिरस्माकं राज्ञ उपदेशार्थं नागतः । किं पुनर्हरधनुर्दर्शनार्थम् ।

---

12 B. णखु णखु & A. C. F. G. णहु णहु. D. णहु only. All except D. G. om. किर. D. om. कस्सवि. B. पामाणिअस्स. B. D. G. बाहिर.

13. B. om. ता & repeats हदम्ह. G. हा for ता.

14. B. repeats किंति

15. D. om. णम्. A. आच्छिणीमीलीइएति (?). D. गमे (?) & G. गमेदि. D. तदा अ for तदो. B. om. इमो. B. खवणकवज, सपणउपकप्पइए (?), E. कमणेक, for खवणोव्व कप्पड F. om. तदो किम् &c.

16. B. एवम् for एदम्. C. E. F. ण & G. जइ for परम् which B. om. C. E. F. G. om. ण before आअदो. G. भवे। इमो in place of किम्.

17 कुब्ज० । किं इमस्स महेसिणो होमग्गिधूमसामलिअलोअणस्स हरचावदंसणेण । ता तक्केमि खत्तिअबम्हणो इमोत्ति ।

18 वाम० । विहस्य । अए कहं तणुव्व मदीवि तुह खुज्जा जं एरिसं तक्केसि । सच्चं खत्तिअबम्हणो एव्व इमो ।

19 कुब्ज० । ता कोवि अणत्थो संभावीअदि । जं किर तवस्साकरिसिदो इमो खत्तिअबम्हणो उज्जमहीणस्स अम्हाणं राइणो रज्जं गहीदुं आअदोत्ति ।

20 वाम० । सन्तं पावम् । ईरिसं मा जप्प । इमो हि चिरतवस्साप-

---

17 किमस्य महर्षेर्होमाग्निधूमश्यामलितलोचनस्य हरचापदर्शनेन । तत्तर्कयामि क्षत्रियब्राह्मणोऽयमिति ।

18 अये कथं तनुरिव मतिरपि ते कुब्जा यदी शं तर्कयसि । सत्यं क्षत्रियब्राह्मण एवायम् ।

19 तत्कोऽप्यनर्थः संभाव्यते । यत्किल तपस्याकार्षितोऽयं क्षत्रियब्राह्मण उद्यमहीनस्यास्माकं राज्ञो राज्यं गृहीतुमागत इति ।

20 शान्तं पापम् । ईदृशं मा जल्प । अयं हि चिरतपस्यापरितोषितस्य ब्रह्मणो वाचया

---

17. C. D. E. F. om. महेसिणो A. om. अग्गि & has मलिण. B. सवलिअ. B. तथा for ता. A. B. इमो क्षत्तिअबम्हणो इये for तक्केमि...त्ति.

18. D. G. om. अए. A. वकुणा & B. D. G. वकुणी for खुज्जा. F. om. जं. D. G. एवम् for एरिसम्. A. B. D. अपि before तक्केसि. A. C. D. F. तक्केमि. B. puts एव after इमो. C. D. E. F. G. om. एव. All except A. have इति at the end.

19. A. G. चिर before तव°. A. तवस्सासिदो. G. adds तिव्वं पेक्खमाणो after इमो. A. उज्जमिय. इदो (?) B. उज्जुयमायिणा. C. D. उज्जमदिणो and G. रुज्जुमादिणो. B. C. राएसिणो. C. गहीईमाअदो° (?)

20. C. E. F. repeat सन्तं पावम्.

रितोसिदस्स बम्हणो वाआए खत्तिअत्तणं परिहरिअ बम्हणत्तणं पत्तो।

21 कुब्ज॰। कहं तणुव्व मदीवि तुह वामणी। जं एरिसेवि अलीअलोकवुत्तन्ते पत्तिआअदि। जइ कस्सवि वाआए खत्तिओ वि बम्हणो होइ ता मह वाआए तुमं वि बह्मणो होसि।

22 वाम॰। अए बालिस कहं तुह गोमुहस्स भअवदो चउम्मुहस्स वि णात्थि अन्तरम्।

23 कुब्ज॰। जइ इमो सुद्धो बम्हणो ता किं इमस्स चावचिन्ताए।

24 वाम॰। अत्थि कारणम्। तस्स हि पासम्मि तदो जेव्व गहीदचावविज्जा दोणि खत्तिअकुमारा वसन्दि। ताणं दंसइस्सदि चावंति।

क्षत्रियत्वं परिहृत्य ब्राह्मणत्वं प्राप्तः।

21 कथं तनुरिव मतिरपि ते वामनी यदीदृशेऽप्यलीकलोकवृत्तान्ते प्रत्याय्यते। यदि कस्यापि वाचया क्षत्रियोऽपि ब्राह्मणो भवति तन्मम वाचया त्वमपि ब्राह्मणो भवसि।

22 अरे बालिश कथं तव गोमुखस्य भगवतश्चतुर्मुखस्यापि नास्त्यन्तरम्।

23 यद्ययं शुद्धो ब्राह्मणस्तात्किमस्य चापचिन्तया।

24 अस्ति कारणम्। तस्य हि पार्श्वे तत एव गृहीतचापविद्यौ द्वौ क्षत्रियकुमारौ वसतः। तयोर्दर्शयिष्यति चापमिति।

A. बम्हणस्स for बम्हणो. C. E. F. वाआ for वाआए.

21. D. अदिदिग्धी (?) for मदीवि तुह. A वकुणी for वामनी. B. F. एरिसम् & G. एरिस.° D. G. om. वि after एरिसे. C. E. F. वअणे for वुत्तन्ते. G. adds वि after वुत्तन्ते. A. B. D. om. वि after खत्तिओ. F. om. होइ.

22. A. om. this speech. D. G. अरे. D. अणात्थि अं (?) for वि... अन्तरम्.

23. A. om. जइ...बम्हणो. A. B. D. G. सुध्ध°. C. E. F. add इर before चाव.

24. A. से for तस्स. D. G. om. हि. A. D. om. तदो जेव्व. G. वहान्ति. D. om. त्ति.

25 कुब्ज० । ता सुध्धासओ इमो ।

26 वाम० । अह इम् ।

27 कुब्ज० । ता कहेहि दाव इमस्सिं अलीअदूसणारोवेग मह पावं उप्पणं ण वेति ।

28 वाम० । पावंति किं भणीअदि । णं महापावं उप्पण्णम् ।

29 कुब्ज० । मुरुख ण आणासि रे धम्मस्स तत्तम् । सम्बन्धिअणे परिहासवअणाइं ण हु पावकारणाइं ।

30 वाम० । कहं उण इमो तुह सम्बन्धिअणो ।

31 कुब्ज० । ण आणासि रे । अस्सवि दोणि कुमारा अम्हाणं वि दोणि कुमारीओ । ता तक्केमि सम्बान्धिअणो हविस्सदित्ति ।

---

25 तच्छुद्धाशयोऽयम् ।

26 अथ किम् ।

27 तत्कथय तावदस्मिन्नलीकदूषणारोपेण मम पापमुत्पन्नं न वेति ।

28 पापमिति किं भण्यते । ननु महापापमुत्पन्नम् ।

29 मूर्ख न जानासि रे धर्मस्य तत्त्वम् । सम्बन्धिजने परिहासवचनानि न खलु पापकारणानि ।

30 कथं पुनरयं तव सम्बन्धिजनः ।

31 न जानासि रे । अस्यापि द्वौ कुमारावस्माकमपि द्वे कुमार्यौ । तत्तर्कयामि सम्बन्धिजनो भविष्यतीति ।

---

25. A. सुद्धासत्तु (translated as सुखेनास्ताम्) & C. E. सुध्धासो.

27. D. इमाम्मि. A. विअ after इमास्सिम्. A. D. रोवणेण. D. G. णम् before मह.

28. D. om. पावन्ति. A. संपण्णम्.

29. D. G. अरे before मुरुख. A. G. om. रे. B. धम्मस्स वुत्तम्. C. E. F. धम्मवुत्तन्तम्. D. धम्मतत्तम्. B. सम्बन्धिअ°. D. जण°. B. C. E. F. om. हु. B. G. करणाइं.

31. D. G. add अरे before ण. A. B. D. G. om. रे. B. दोवि in both places. D. कुमारआ. A. om. अम्हाणं...°रीओ. F. om. दोणि. A. B. D. सम्बन्धो. B. C. E. om. त्ति.

32 वाम० । निश्वस्य । कहं उण अम्हाणं एरिसं पुण्णम् ।

33 नेपथ्ये ।

ताटङ्किना झटिति ताडितताटकेन
रामेण पद्मरमणीयविलोचनेन ।
क्रीडाशिखण्डकधरेण सलक्ष्मणेन
साकं मुनिः कुशिकसूनुरितोऽयमेति ॥ १ ॥

34 वाम० । सहर्षविस्मयम् । अहो जा किर सअललोअभीसणा रक्खसी ताडएति सुणीअदि सा इमिणा जइ ताडिदा ता इमस्सि हरचावारोवणं वि संभावीअदि । ता एहि इमं कण्णसुहारसं भट्टिणीणं समप्पम्ह ।

इति निष्क्रान्तौ ।

प्रवेशकः ।

ततः प्रविशति रामलक्ष्मणानुगतो विश्वामित्रः ।

35 विश्वामित्रः । अङ्गुल्या दर्शयन् । वत्स राम

एतत्तर्कय चक्रवाकहृदयाश्वासाय तारागण-
ग्रासाय स्खलदिन्दुमण्डलपरीहासाय भासां निधिः ।

---

32 कथं पुनरस्माकमीदृशं पुण्यम् ।

34 अहो या किल सकललोकभीषणा राक्षसी ताडकेति श्रूयते सा अनेन यदि ताडिता तदस्मिन्हरचापारोपणमपि संभाव्यते । तदेहीमं कर्णसुधारसं भट्टिनीभ्यः समर्पयामः ।

---

32. G. विहस्य. All except A. om. उण. C. E. F. भाअधेअम्.

34. B. D. °र्ष सवि°; & B. च after it. A. om. अहो & जम् for जा. C. D. E. F. om. जइ. D. om. ता & has इमस्स. C. D. E. F. om. वि. D भट्टिणीए. G. om. इति before निष्क्रान्तौ and puts it before प्रवेशकः.

35. B. C. F. G. om. विश्वामित्रः. A. om. राम. D. G. रामभद्र. B. D.

दिक्कान्ताकुचकुम्भकुङ्कुमरसन्यासाय पङ्केरुहो-
ल्लासाय स्फुटवैरिकैरववनत्रासाय विद्योतते ॥ २ ॥

36 रामः । अञ्जलिं बद्ध्वा ।

लालयन्तमरविन्दवनानि
क्षालयन्तमभितो भुवनानि ।
पालयन्तमथ कोककुलानि
ज्योतिषां पतिमहं महयामि ॥ ३ ॥

37 विश्वा० । स्वगतम् । अपि नाम मयोपनीयमानं वत्सरामभद्रमचिरादेव जनकस्तनूजया संभावयिष्यति ।

38 लक्ष्मणः । आर्य पश्य पश्य ।

यावन्नीरनिधेः प्रभातसमयः प्रोद्धृत्य लोकत्रयी-
माणिक्यं रविबिम्बमम्बरवणिग्वीथीपथे न्यस्यति ।
तावत्कर्तुमिवास्य मूल्यमुचितं पद्माकरेण स्वयं
लक्ष्मीर्लब्धविकाशपङ्कजकरन्यस्ता पुरः स्थाप्यते ॥ ४ ॥

39 विश्वा० । सहर्षमात्मगतम् । अये वत्स लक्ष्मणेनैव दत्तमुत्तरम् । देवताधिष्ठितानि हि मुग्धजनवचनानि भवन्ति ।

G. स्फुरत् for स्खलत्. D. कुल for वन.

36. A. कुलानि for वनानि. C. E. कलयामि.

37. A. वत्सम्. A. B. रामचन्द्रम् B. सह after तनूजया. A. योजयिष्यति.

38. C. E. G. om. one पश्य. D. ° समये. A. बद्ध for लब्ध.

39. A. om. वत्स & एव. A. B. खलु for हि. All except A. B. om. जन. D. om. भवन्ति.

40 रामः। भगवन् कथमियं बहुतरकरितुरङ्गतरङ्गितापि राजधानी तपोवनभूमिरिव प्रशान्तपावनी विभाव्यते।

41 विश्वा०। क इह विस्मयः। नन्विह जनकः प्रतिवसति यस्यायं भगवान्याज्ञवल्क्यो गुरुः।

42 रामः। सोऽयं भगवानस्य गुरुर्यः किल योगीश्वर इति ख्यायते।

43 विश्वा०। वत्स स एवायम्।

पादोपजीवनाद्भानोः प्रबोधमुपलभ्य यः।
अभूद्योगीश्वरख्यातेः सद्म पद्ममिव श्रियः॥ ५॥

तदेहि राजभवनमुपसर्पामः।

इति परिक्रामन्ति।

44 नेपथ्ये।

पयोभिः सिच्यन्तां बहलविलसत्कुङ्कुमरसैः
प्रसूनैः कीर्यन्तां परिमलमिलल्लोलमधुपैः।
चतुष्कैः पूर्यन्तामविरललसन्मौक्तिकगणै-
र्मुदा पौरस्त्रीभिर्नगरपथरथ्याङ्गणभुवः॥ ६॥

45 विश्वा०। नूनमस्मदभ्यागमनसानन्दस्य शतानन्दस्य वाक्परिस्पन्दः।

---

40. All except A. B. add रामं प्रति before भगवन् for which D. भगवान्. A. B. add विश्वामित्र after भगवन्. B. G. नर for तर. All except A. B. तुरङ्गम. D. °शान्त.° C. E. F. दृश्यते.

41. D. om. this speech. C. E. F. वत्स before कः. C. जनकराजः, E. जनको राजा, F. जनकराजा.

42. D. om. this speech. C. किल after अयम्. B. खलु for अस्य & विख्या°.

43. A. B. आः before वत्स. A. om. सः. C. E. F. °सेवनात्. A. प्रसादम्. B. लेभे for अभूत्. G. निष्क्रान्तः.

44. D. गलत् for लसत्. A. B. °मयैः for °गणैः.

45. A. जनकस्य for शतानन्दस्य. A. B. G. वाक्यपरि°. A. अलम् for

९

विलोक्य । अहो अस्य रभसातिशयो यदयं कृतमपि नगरपरिष्कारं पुनरादिशति ।

46 प्रविश्य शतानन्दः । भगवन् अभिवादये ।

47 विश्वा० । सौम्य आयुष्मान्भूयाः ।

48 शतानन्दः । भगवन् अयमसौ जनको राजा भवन्तं प्रतीक्षते ।

49 विश्वा० । विलोक्य । अये स एष जनकः ।

अङ्गैरङ्कृता यत्र षड्भिः सप्तभिरष्टभिः ।
त्रयी च राज्यलक्ष्मीश्च योगविद्या च दीव्यति ॥ ७ ॥

ततः प्रविशति जनकः ।

50 जनकः । कृताञ्जलिर्दृष्ट्वा । अये

यः काञ्चनमिवात्मानं निक्षिप्याग्नौ तपोमये ।
वर्णोत्कर्षं गतः सोऽयं विश्वामित्रो मुनीश्वरः ॥ ८ ॥

उपसृत्य । भगवन् अयं ते समीहितसम्पल्लतासमुद्गमारामः प्रणामः ।

51 विश्वा० । राजर्षे वसुन्धरासुनासीर सीरध्वज अप्रतिहतमनोरथो भूयाः ।

इति यथोचितमुपविशन्ति ।

52 जनकः । भगवन् अधुना सुनासीरसाधारणत्वमधःकरणं मे ।

अयम्. B. नगरपथ°. A. B. परिवार. B. पुनरपि.

48. A. om. जनकः. A. B. G. भगवन्तम्. A. ईक्षते.

4/. A. येन & F. यस्य for यत्र. C. E. F. इव for the first च.

50. All except B. G. om. जनकः. A. D. G. भूत्वा for दृष्ट्वा. B. G. om. अये. D. समुन्नत for संपल्लता. A. समूहद्भुना ° for समुद्गमा °. B. °हितसपल्लवतासमुन्नतफलारामः &c.

51. A. समीहितं लभस्व for सीर ...भूयाः. B. अप्रतिरथ अवितथ ° for अप्रतिहत °. A. om. इति &c.

52. D. धारणम् for साधारणत्वम्.

53 विश्वा० । कथमिव ।

54 जनकः । संप्रति हि तदीयामपि पदवीमतीत्य वर्ते ।

गाधिनन्दन न नन्दनजन्मा
ताद्दशः स हरिचन्दनशाखी ।
याद्दशो मम भवत्पदपद्म-
द्वन्द्ववन्दनविधिः सुखहेतुः ॥ ९ ॥

55 विश्वा० । अहो ते प्रणयातिशयो यत्सहजप्रमोदसुधाम्बुधिनिमग्नोऽप्यस्मत्समागमजन्मनः सुखशीकरान्बहुमन्यसे ।

56 जनकः । भगवन् अस्मद्विधानां राज्यरागोपरक्तचित्तचन्द्रमसां कुतस्त्योऽयं सहजानन्दचन्द्रिकोद्भेदः ।

57 विश्वा० । मैवं भोः ।

ज्याघातः कार्मुकस्य श्रयति करतलं कण्ठमोङ्कारनाद-
स्तेजो भाति प्रतापाभिधमवनितले ज्योतिरात्मीयमन्तः ।
राज्यं सिंहासनश्रीः शममपि परमं वक्ति पद्मासनश्री-
र्येषां ते यूयमेते निमिकुलकुमुदानन्दचन्द्रा नरेन्द्राः ॥ १० ॥

58 शता० । भगवन् सत्यमेतत् । एते हि

वाराङ्गनाकरतरङ्गितचामरोर्मि-
श्वेतातपत्रशतपत्रिणि राजहंसाः ।

---

54. All except D. om. हि. D. तथस्याम्. C. E. F. अतिवर्ते.

55. All except A. have य: for यत् which E. om. F. adds त्वम् after यत्. G. सुख for सुधा. A. जन्म°.

56. A. भोग for राग. B. G. चेतस्. A. कः & B. कुतः for कुतस्त्यः.

57. A. वक्षः for तेजः; अनल for अभिध; & °तलम्.

58. A. D. G. om. भगवन्. A.

क्रीडन्ति राज्यसरसि स्वरसं च धीरा
योगीन्द्रचन्द्रसुगमे पथि संचरन्ति ॥ ११ ॥

59 लक्ष्मणः । अपवार्य । आर्य राजानोऽप्यमी ब्रह्मविद्याचतुरा इति चित्रीयते मे चेतः ।

60 रामः । वत्स किमत्र चित्रम् । ननु

छत्रच्छाया तिरयति न यद्यन्न च स्प्रष्टुमीष्टे
दृप्यद्गन्धद्विपमदमषीपङ्कनामा कलङ्कः ।
लीलालोलः शमयति न यच्चामराणां समीरः
स्फीतं ज्योतिः किमपि तदमी भूभुजः शीलयन्ति ॥ १२ ॥

61 विश्वा० । आङ्गिरस उचितमात्थ राजहंसा इति । सकलकुवलयोत्तंसाः किल राजहंसा एवामी ।

62 जनकः । भगवन् इदमस्मत्प्राचीनेषु शोभते । न तु कतिपयग्रामटिकास्वामिनि मयि ।

63 विश्वा० । राजर्षे मैवम् ।

अवनिमवनिपालाः सङ्घशः पालयन्ता-
मवनिपतियशस्तु त्वां विना नापरस्य ।
जनक कनकगौरीं यत्प्रसूता तनूजां
जगति दुहितृमन्तं भूर्भवन्तं वितेने ॥ १३ ॥

---

om. एते हि. B. वृन्द for चन्द्र. C. E. F. संचरन्तः.

59. A. om. आर्य. A. अधीत for अमी which F. om. C. E. F. °कुशलाः. D. F. om. मे.

60. A. B. D. G. इह for अत्र. C. D. E. F. om. ननु. A. स्प्रष्टुमीष्टे न यद्य. D. स्फीत°.

61. G. om. किल. D. G. om. एव.

62. C. E. F. om. भगवन्. A. D. G. put मयि after तु instead of after °स्वामिनि. A. D. ग्राम.

63. D. G. om. राजर्षे. A. om. मैवम्. G. ओः after मैवम्. A. तत् for तु D. °गौरी & तनूजा. A. प्रसूताम्.

64 जनकः । भगवन् नूतनभुवननिर्माणनिपुणस्य भगवतः कियतीयमभिनववचनचातुरी नाम । स खलु भवान्यस्य

शलाकीकृत्य स्वां दृशमसमकोपारुणरुचिं
सुरश्रेणीचित्रं गगनतलभित्तौ रचयतः ।
सुधांशोर्भानोश्च प्रथमरचितं बिम्बयुगलं
सुधालाक्षासान्द्रद्रवभरितपात्रद्वयमभूत् ॥ १४ ॥

65 शता॰ । राजर्षे सत्यमात्थ । किमुच्यतेऽसौ भगवान् ।

त्रिशङ्कोः स्वर्लोकादवनितलपातं रचयितुं
सुनासीरे कोपाद्विकसितदृगब्जे विकसितः ।
यदीयोऽसौ नव्यत्रिदशनगरारम्भरभसः
सुरस्तोमे भक्त्या मुकुलितकराब्जे मुकुलितः ॥ १५ ॥

66 लक्ष्मणः । अपवार्य । आर्य कथमेवंविधं भगवतः प्रतापितभुवनत्रयं तपोभिधानं तेजः ।

67 रामः । अयि न विदितं ते ।

रोषाभितप्तपुरुहूतपदाभिभूतं
दृष्ट्वा त्रिशङ्कुमथ कोपविपाटलश्रीः ।
आकुड्मलीकृतकराम्बुजराजिरम्या
सन्ध्येव दृष्टिरमरैर्यदुपासितास्य ॥ १६ ॥

---

64. C. E. F. शत & D. शतमख for नूतन. C. E. F. भवतः. A. B. गाधिनन्दनस्य भवतः after भगवतः. C. खलु स. D. om. यस्य. A. शिलाकी.° C. E. F. रुचम्.

65. B. puts भगवान् before किम्. All except A. G. om. असौ. All except D. have पद for दृग्. A. अमे for अब्जे.

66. All except D. G. om. अपवार्य. A. om. आर्य. B. °विश्वस्य. A. om. भगवतः. F. प्रमापित. B. °त्रयस्य. A. तत् for तपस्.

67. B. C. E. G. अपि. D. इदम्, before ते. A. B. G. राजर्षेरिदम् after ते. D. G. भूत for तप्त. D. °रम्यम्.

68 विश्वा० । राजर्षे अपि तावद्रत्नगर्भागर्भसंभवं कन्यारत्नमलङ्कुरुते त्वाम् ।

69 जनकः । भगवन् भवत्प्रसादादधुना जामातृरत्नमप्यलङ्करिष्यते ।

रामममवलोक्य सकौतुकम् । भगवन्

सकलजनविलोचनोत्सवाना-
मयमयनं कतरः पुरः कुमारः ।
हरितमणिमयूखहारिणो यः
कलयति कल्पतरोः प्ररोहलीलाम् ॥ १७ ॥

70 शता० । भगवन् अयं च कतरो यः खल्वस्यैव

नीलनीरजदलोज्ज्वलकान्ते-
रन्तिके स्फुरति काञ्चनगौरः ।
लोचनस्य सुदृशः श्रवणाग्रे
संनिविष्ट इव चम्पकगुच्छः ॥ १८ ॥

71 विश्वा० । नाम्ना तावद्रामलक्ष्मणावेतौ ।

72 जनकः । अहो कर्णामृतम् ।

73 शता० । निर्वर्ण्य । भगवन्

एतयोरहमुदाररूपयो-
रुल्लसत्सहजसौहृदश्रियोः ।

---

68. A. नाम after अपि. C. E. F. संभूतम्.

69. B. om. भगवन्. A भवतः & D. त्वत् for भवत्. B. जामातरम्. A. D. F. °करिष्यति. F. राममुखम्. B. D. आलोक्य. F. G. विलोकन. C. D. E. पुनः for पुरः. A. B. कुमार एषः. A. D. °मयस्य for °मयूख. D. मयूष. B. यत्. A. प्रतीह (?) लीलाम्.

70. A. has भगवतश्च कतरो यः खलु यस्यैव for our शता० । ...एव. D. उत्पल for उज्ज्वल.

73. A. om. भगवन्. D. has for the last two lines of the nine-

कामापि स्वजनतां विभावये
कौस्तुभामृतमयूखयोरिव ॥ १९ ॥

74 जनकः ।

एतयोः प्रकृतिरम्यरूपयो-
रुल्लसत्सहजसौहृदश्रियोः ।
अन्तरे स्फुरति कोऽपि संनिधिः
प्रत्यगात्मपरमात्मनोरिव ॥ २० ॥

75 विश्वा० । अयि योगीश्वरशिष्य ईदृशेषु गभीरेष्वभिनवोदन्तपीयूषवेशन्तेषु भवत एव मनो निमज्जति । स्वजनभावे पुनरनयोर्वयमपि साक्षिणः ।

76 जनकः । तत्किं भ्रातरावेतौ ।

77 विश्वा० । अथ किम् ।

78 जनकः । सहर्षं निर्वर्ण्य ।

तनुश्रिया निर्जितचम्पकोत्पलौ
सुवर्णनीलोत्पलकोशकोमलौ ।
अहो दृशामुत्सवदानदक्षिणौ
सुलक्षणौ लक्ष्मणलक्ष्मणाग्रजौ ॥ २१ ॥

पुना रामं विलोक्य सकौतुकम् । भगवन् किमेतत् ।

यथाहं निःसीमोत्सवसुभगभोगे भवकथा-
पथातीते चेतःप्रणयिनि रमे पुंसि परमे ।

---

teenth stanza those of the next, and omits speech 74.

74. C. E. F. अलमुदार for प्रकृतिरम्य. D. G. आन्तरः. for अन्तरे.

75. C. E. F. अये. B. om. गभीरेषु, & उद्धत for उदन्त. F. पीयुषेषु for पीयूषवे ... षु. C. D. E. F. एव for अपि.

76. F. इमौ for एतौ.

78. A. वाम & C. D. E. F. शाखि for कोश. D. E. आलोक्य & C. F. अवलोक्य. A. D. भोगो-

तथैवास्मिन्बाले दलदमलनीलोत्पलदलो-

दरश्यामे रामे नयनपदवीमागतवति ॥ २२ ॥

79 विश्वा० । स्वगतम् । उचितमेतत् । न खलु सकललोकलोचनानन्द-करः शीतकरः शङ्करशिरःशयालोः कलानिधेरपरं तत्त्वम् । प्रकाशम् । राजर्षे स एष सौन्दर्यातिशयस्य महिमा ।

80 जनकः । कः पुनराभ्यां पुत्रवतां मौलिमाणिक्यतामारोपितः ।

81 विश्वा० ।

किं शीतांशुमरीचयः किमु सुरस्रोतस्विनीवीचयः

किंवा केतकसूचयः किमथवा चन्द्रोपलानां चयः ।

इत्थं जातकुतूहलाभिरभितः सानन्दमालोकिताः

कान्ताभिस्त्रिदिवौकसां दिशि दिशि क्रीडन्ति यत्कीर्तयः ॥२३॥

82 रामः । वत्स नूनमयं सकलगुणावदातस्तातः प्रस्तूयते ।

83 लक्ष्मणः । अपि नाम भूयोऽपि प्रस्तोष्यते ।

84 विश्वा० । अपि च ।

यस्योद्यद्भुजदण्डचण्डिमचलत्कोदण्डलीलायिते-

र्निष्पीते दनुजेन्द्रचन्द्रवदनाभ्रूवल्लरीविभ्रमे ।

स्तवकथापथातीतः. D. जने for रमे & °पदवी सा गतवती.

79. C. E. F. इदम् for एतत्. A. om. शीतकरः & कलानिधेः, & reads अपरत्वम्. B. om. सः. C. E. F. °शयमहिमा.

80. A. B. G. om. °ताम्. B. आसादितः.

82. B. om. वत्स. C. D. E. F. add स्फीतः after °दातः. C. E. F. स्तूयते.

84. A. B. om. अपि च. D. लसत् & G. वलत् for चलत्. A. निष्पन्नैः & विभ्रमैः. B. G. have अपि च be-

लक्ष्मीमस्त्रविपाटलक्षतमयीमालम्बते केवलं
पौलोमीकरजाङ्कुरव्यतिकरादाखण्डलीयं वपुः ॥ २४ ॥

तस्य पद्मवनबान्धववंशो-
त्तंसमांसलमहामणिमौलेः ।
कायकान्तिपरिभूतमनोजौ
ताविमौ दशरथस्य तनूजौ ॥ २५ ॥

जनकः । सहर्षम् ।

यद्बाहू वहतः पराक्रमहतां प्रत्यर्थिसीमन्तिनी-
चक्षुःकज्जलकालिकामिव धनुर्मौर्वीकिणश्यामिकाम् ।
यद्दोर्दुर्मदकर्मकार्मुकगुणप्रोच्चालकोलाहलै-
र्वैरिस्त्रीकलमेखलाकलकलाः पीता इवास्तं गताः ॥ २६ ॥

अपि च ।

यस्येन्द्रारिजयश्रिया सह झटित्याकृष्य मौर्वीलतां
साकं भूवलयेन चापवलयं दोर्मण्डले बिभ्रति ।
पौलोमीकुचकुम्भसीमनि रहः पश्यन्नखाङ्कं नवं
धत्ते चेतसि केवलं न तु करे कोदण्डमाखण्डलः ॥ २७ ॥

तपनकुलशिरःकिरीटकोटि-
स्फुरदरुणोत्पलकुड्मलस्य तस्य ।
दशरथनृपतेरिमौ मृगाङ्क-
प्रतिमसुरेखमुखाम्बुजौ तनूजौ ॥ २८ ॥

---

fore stanza 25. G. कुमारौ for तनूजौ.
85. D. भवतः for वहतः & °भृताम् for °हताम्. A. तीव्र for कर्म, and इह for इन्द्र. C. D. E. चपल for उदाल. B. मृगाङ्क°.

86 विश्वा०। अथ किम्।

87 जनकः। अहो धन्यता दशरथस्य यस्य द्वे अपि तनयावलोकन-शीतले दृशौ।

88 शता०। दिशौ च।

89 विश्वा०। ननु दिश इति वक्तव्यम्।

90 जनकः। तत्किमन्यावपि कुमारौ दशरथस्याङ्कं विभूषयतः।

91 विश्वा०। अथ किम्। यौ खलु भरतशत्रुघ्नौ प्रतिबिम्बाविव रामल-क्ष्मणयोः।

92 शता०। नूनममी ऋष्यशृङ्गचरुभागानां विलासाः।

93 जनकः। दशरथभागधेयानां च।

94 विश्वा०। एवमेतत्। अवधिः खलु भाग्यवतां राजा दशरथः।

95 जनकः। माहात्म्यवतां च।

96 विश्वा०। तत्किमस्माभिरुच्यते। भवतोर्महिम्नि भवन्तावेव सा-क्षिणौ।

97 जनकः। कतरोऽहं दशरथस्य महिमाभोगमनुभवितुं कासार इव सागरस्य।

---

87. A. D. आलोकन. D. °शालि.
88. D. वा for च.
89. C. D. E. F. om. ननु.
90. G. शतानन्द for जनक. A. om. अङ्कं...यतः. B. D. G. om. वि.
91. D. om. किम्. C. E. किल for खलु.
92. D. ननु for नूनम्.
93. B. °रथस्य. A. om. च.
94. F. om. एवमेतत्.
95. C. D. E. F. महात्मनाम् & G. महात्म्यवताम्.
96. C. E. F. कथम् for किम्. G. उच्यताम्.
97. D. °रथमहिमा. A. महिमानम्.

98 विश्वा० । शोभन्त एव विनयमधुराणामवरीकृतात्ममहिमानः कामं सत्यविधुरा अपि वाचः। अथवा समुचितमेवैतत् । यतः

जज्ञिवान्दशरथः स हि राजा
राममिन्दुमिव सुन्दरमूर्तिम् ।
लोकलोचनविगाहनशीतां
त्वं पुनः कुमुदिनीमिव सीताम् ॥ २९ ॥

99 लक्ष्मणः । अपवार्य । आर्य इन्दुकुमुदिनीदृष्टान्तेन किमपि संविधानं सूचितं भगवता ।

100 रामः । सप्रणयकोपम् । अलमलौकजल्पितेन ।

101 जनकः । स्वगतम् । कथमनया भङ्ग्या किमपि सूचितं मुनिना। तत्किमनेन रभसवशंवदेन विस्मृतमेव शाम्भवं धनुः। प्रकाशम् । भगवन् अनेन भवतो वक्रकमनीयेन वाग्विलासेन द्वितीयेनेव हरकार्मुकेण किमपि कौतुकितोऽस्मि ।

102 विश्वा० । स्वगतम् । कथमनया परिपाट्या हरचापारोपणमुद्भावयति। भवतु । प्रकाशम् । राजर्षे साधु स्मारितोऽस्मि । अस्ति हि मे

---

98. B. राजर्षे before शोभन्ते. A. om. विनय. A. B. असत्य. C. E. F. om. एव. A. om. यत:. A. B. गात्र for मूर्ति. F. कोक for लोक. B. G. शीलाम् for सीताम्,

99. A. om. अपवार्य. C. E. om. अपि. A. संविधानम्, B. संविधान-सूक्तम्, & C. E. F. अभिहितम् for सं...चितम्.

100. A. G. आलापितया & B. D. आलापतया.

101. B. एतेन. A. आवेशवशेन. All except A. have भगवता:. D. om. इव. A. om. किमपि.

102. A. C. E. F. परिपाटिकया. A. om. भवतु. A. B. D. G. अस्तीव for अस्ति. B. G. om. हि. B. D. G. वृषभ. A. B. आलोकने. B. om.

कौतुकं वृषकेतुकार्मुकावलोकने । तेन तदानयनार्थमादिश्यन्तां पुरुषाः । अथवा किमन्यैः । रामभद्र एवादिश्यते ।

103 जनकः । सविस्मयम् । भगवन् कथं मुग्ध इव दुग्धमुखमपि रामं मुग्धेन्दुकिरीटकार्मुकानयनार्थमादिशसि । न जानासि किम् ।

एतत्तद्दुर्विगाहं तुहिनगिरिमयं कार्मुकं यत्र जज्ञे
मौर्वीदर्वीकराणां पतिरुदधिसुतानायकः सायकश्च ।
दोर्दण्डैश्चन्द्रमौलेर्नतमपि यदभूदुन्नतं कार्मुकाणां
बाष्पाम्भोवृष्टये च त्रिपुरमृगदृशामैशमप्यैन्द्रमासीत् ॥३०॥

104 विश्वा० । जानामि ।

सेवायातसमस्तखेचरकरक्रीडाचलच्चामर-
श्रेणीमारुतपानपीननिबिडज्यापन्नगाकर्षिणा ।
गाढाकुञ्चनजृम्भमाणतुहिनस्यन्दैर्यदीयैः श्रमः
संत्यक्तः पुरवैरिणापि तदिदं शैलेन्द्रसारं धनुः ॥ ३१ ॥

105 जनकः । तत्कथमस्यानयनाय राममादिशसि ।

106 विश्वा० । न केवलमानयनाय । किन्त्वानमनाय च । रामं प्रति । वत्स बध्यतां परिकरः । इदं च

मारीचमारीचतुरं सुबाहोरपबर्हणम् ।
न्यस्यतां लक्ष्मणकरे ताडकाताडनं धनुः ॥ ३२ ॥

तेन. F. ततः after तेन. D. तवीय for तत्. D. G. आनयनाय. A. B. D. G. आदिश्यताम्.

103. D. om. भगवन्...किम्. F. om. मुग्ध इव. B. अर्धे for मुग्ध which G. om. B. मौलि for किरीट. A. om. न जानासि. A. सृष्टये for वृष्टये.

104. A. कुञ्चित & B. कर्षण for कुञ्चन. A. यदीयः & D. F. यदीय°.

105. G. रामाय.

106. C. E. F. अपि for किम्. D. om. किन्तु. A. G. om. च. A. D. मार for मारी. A. B. D. वाहनम् & G. वारणम् for बर्हणम्.

107 जनकः । भगवन् कथमसंभावनीयमेवोद्भावयसि ।

108 विश्वा० । कथमिदं न विदितं ते । अनेन हि

प्राप्य चापनिगमानितः क्रमा
त्संप्रताप्य विशिखैर्निशाचरान् ।
अस्मदीयमखरक्षणक्रिया
दक्षिणेन गुरुदक्षिणीकृता ॥ ३३ ॥

109 जनकः । विमृश्य निश्वस्य च । भगवन् अस्त्वेतत् । किन्तु

मारीचमुख्यरजनीचरचक्रचूडा-
चञ्चन्मरीचिचयचुम्बितपादपीठः ।
अत्रभवद्भिफलबाहुबलावलेपो
वीरः शशाङ्कमुकुटाचलचालनोऽपि ॥ ३४ ॥

110 विश्वा० । किमेतावता । नन्वत एव राममादिशामि । रामं प्रति । वत्स उत्तिष्ठ । कुमुदिनीकान्तकलाकिरीटकार्मुकारोपणप्रवीणतया प्रीणयास्मान् ।

111 जनकः । स्वगतम् ।

यस्य ख्याता जगति सकले निस्तमिस्त्रा तपःश्री-
र्मिथ्योत्कण्ठः कथमिव भवेदेष गाधेस्तनूजः ।
बालो रामः किमपि गहनं कार्मुकं चन्द्रमौले-
र्दोलारोहं कलयति मुहुस्तेन मे चित्तवृत्तिः ॥ ३५ ॥

---

107. G. om. भगवन्. F. om. एव for which A. B. इव.
108. A. अविदितम्. B. om. ते. G. °वक्षतैव.
109. A. D. G. अस्ति & B. एवम् for अस्तु. D. लता for बल.
110. A. इमम् for अतः. D. उत्तिष्ठ वत्स. C. E. F. °रोपणे. B. D G. संप्रीणय.
111. D. G. इह for इव. A. °खेलम् for °रोहम्. A. आलोच्य.

पुनः पृथिवीमालोक्य ।

रतिरिव जननेत्रानन्दिनी नन्दिनी ते
कुसुमशर इवायं रूपसारः कुमारः ।
यदि च धनुरपीदं प्राप्तमेतस्य हस्तं
कुसुमचयमिव स्यात्संभृतः संप्रदायः ॥ ३६ ॥

112 शता० । राजर्षे किमेतन्मूढ इव मुहुर्मुहुरालोकसे । अनुवर्तस्व महर्षेर्वचनम् ।

113 जनकः । प्रकाशम् । अनुवृत्तमेव । रामं प्रति । वत्स अनुष्ठीयतां गुरुवचनम् ।

114 रामः । उत्थाय परिकरं बध्नाति ।

115 प्रविश्य प्रतीहारी । जेदु जेदु देवो । कोवि बम्हणो देवस्स दंसणत्थी दुआरदेसम्मि वट्टदि । ता किं पवेसीअदु ।

116 जनकः । आः इदमपि किं जनकः प्रष्टव्यः ।

117 प्रती० । तह । इति निर्गत्य तेन सह प्रविशति ।

118 जनकः । ब्रह्मन् प्रणम्यते ।

119 मुनिः । राजन् सुमतिर्भूयाः ।

---

115 जयतु जयतु देवः । कोऽपि ब्राह्मणो देवस्य दर्शनार्थी द्वारदेशे वर्तते । तत्किं प्रवेश्यताम् ।

G. तु for च. B. चय for मय. C. E. F. इवम् for इव.

112. A. om. मूढ इव मुहुः. D. अवलोकसे.

113. A B. अनुमतम्.

115. A. B. om. जेदु ...देवो. C. D. om. जेदु. D. दुआरम्मि.

116. A. om. आः. C. E. F. put किम् last. A. प्रवेष्टव्यः for जन...व्यः.

117. A. B. om. सह । इति. A. निर्वर्त्य.

118. A. प्रणम्यसे.

120 जनकः। स्वगतम्। अन्यादृशीयमाशीःपरिपाटी। भवतु। प्रकाशम्। मुने इहास्यताम्।

121 मुनिः। संदेशहरः खल्वस्मि।

122 जनकः। कस्यायं कीदृशो वा संदेशः।

123 मुनिः।

पीत्वा कज्जलकालकूटमखिलक्ष्मापालनारीदृशां
नीत्वा स्फीतयशोऽट्टहासमहसा लोकत्रयीं शुभ्रताम्।
चण्डीशं चरितैकदेशविभवैरद्यापि यः सेवते
हे वैदेह स जामदग्न्यपरशुस्त्वामेतदाभाषते॥ ३७॥

124 जनकः। स्वगतम्। अहो गर्वाङ्कुरस्य वक्रता। भवतु। प्रकाशम्। किं तत्।

125 मुनिः।

कस्मैचिद्देहि कन्यां नरपतिशिशवे दीर्घमायुर्लभस्व
व्यावर्तस्वाप्रियान्नः पुरमथनधनुःकर्षणालापपापात्।
नो चेदेकोऽभ्युपायस्तव कलुषमषीपङ्कसंक्षालनाया-
मस्मद्दिस्तारिधाराञ्चलवहलपयःपूरदूरावगाहः॥ ३८॥

126 जनकः। विहस्य। तन्ममापि प्रतिसंदेशः कथनीयस्तस्य।

---

120. A. puts अथ & B. कथम् before अन्या°. A. अन्यादृशा. A. B. महर्षे for मुने. B. om. इह.

121. F. °हारः & om. खल्वस्मि.

122. D. om. कस्य. C. E. F. om. कस्यायम् & have असौ for वा.

123. B. G. कालिमानम्. B. F. G. अखिलम्. A. °दृशोः. A. B. G. लोकत्रयम्. C. भूभृताम् & G. शुभ्यताम् for शुभ्रताम्. A. B. G. चरितैरनेक°.

124. C. E. F. add मुने before किम्.

125. A. कनकशरिवृताम् for नर...शवे. A. B. G. अन्योऽस्त्युपायः. D. क्षालनार्थम् & F. °नाय. A. धारा for पूर.

126. B. G. मया for मम. A. om. तस्य for which D. चास्य.

127 मुनिः । कीदृशोऽसौ ।

128 जनकः ।

त्वं मित्रं मम जामदग्न्यपरशो तेनैतदाभाष्यसे
संप्रत्येव यथाप्रतिश्रुतमियं कन्या मया दीयते ।
तेनेह स्वयमेत्य धूर्जटिधनुर्धौरेयदोःसंपदो
जामातुः पुरतश्चिराय भवता धाराजलं त्यज्यताम् ॥ ३९ ॥

129 मुनिः । तथास्तु । इति निष्क्रान्तः ।

130 जनकः । आङ्गिरस उपक्षिप्तस्तावदयं जामदग्न्येन निजकोपानलविस्फुलिङ्गः ।

131 शता० । किमेतावता । अतिगम्भीरभुजसारकासारकैरवारामः खलु रामः ।

132 विश्वा० । राजर्षे के पुनरमी परितः स्फुरन्मणिमौलयः परःसहस्रा दृश्यन्ते ।

133 जनकः ।

यस्य त्र्यम्बकमौलिखेलदमलस्वर्लोककल्लोलिनी-
लीलालङ्घनलम्पटेन यशसा दिग्भित्तयः क्षालिताः ।
सोऽपि त्वं जनकाधिराजतनयाबद्धाभिलाषः कथं
हा जातोऽसि पुलस्त्यसंततियशःशीतद्युतेर्लाञ्छनम् ॥ ३ ॥

13 मुनिः । सकौतुकम् । ततस्ततः ।

---

line & उदर्क...दृश्यते as the second.

9. A. प्रभो. B. F. have one ततः & G. has none.

10. C. D. E. ततश्च. A. एवम् & B. G. एकम् after विहस्य. B. om. हि.

11. All except B. G. om. this speech & करालकः of 12, thus making ततः &c., as a continuation of 10. B. वा कविस्थानि लोकस्य.

12. A. G. om. स before प्रणय. C. E. °कोपं सविषादम्. A. F. om. इदम्. D. कोपमाह &c., C. E. बद्ध for बद्ध.

13. A. one ततः. F. om. ततस्ततः.

14 करा० । ततः ।

कोपपाटलितलोलदृष्टिना
किंचिदुन्नमितखड्गयष्टिना ।
रावणेन नयधर्मभूषण-
स्ताडितो हृदि पदा बिभीषणः ॥ ४ ॥

15 मुनिः । हन्त नूनम्

लङ्केश्वरेण दुष्टेन नयधर्मविभूषणः ।
बिभीषणः स न परं विभवोऽपि पदा हतः ॥ ५ ॥

ततस्ततः ।

16 करा० । ततः कतिपयपरिवारेण बिभीषणेन लङ्केश्वरं विहाय राम एव समाश्रितः ।

17 मुनिः । स्वगतम् । अनुष्ठितं तर्हि पुलस्त्यसंदेशरहस्यं बिभीषणेन । प्रकाशम् । भवान्पुनः किमधुना कर्तुकामः ।

18 करा० । अहमादिष्टोऽस्मि माल्यवता । जानकीविरहविह्वलहृदयस्य लङ्केश्वरस्य मनोविनोदनाय केनापि चित्रकारेण विरचितं चित्रपटमिदम् । तद्गोचरीकरणीयमिति ।

---

14. D. om. ततः. B. D. F. G. ततश्च. A. खड्गमुष्टिना. C. E. F. मार्ग for धर्म.

15. C. D. E. रुष्टेन. A. बिभीषणः for विभूषणः. A. B. G. च for स. B. C. D. E. repeat मुनि before ततस्ततः. A. B. om. one ततः.

16. B. ततश्च. D. कतिपयसहायेन. D. G. om. बिभीषणेन. A. नूनम् before रामः. C. E. राममेवानुगतम् for राम...श्रितः.

17. A. B. om. पुनः.

18. D. उज्वलद् & F. विज्वल for विह्वल. A. °विह्वलस्य. D. om. लङ्केश्वरस्य. C. G. चित्रकरेण. A. चित्रितम् & B. रचितम्. B. चित्रपट्टकम्, C. चित्रपट्टम् & G. चित्रम्. D. om. चित्रपटमिदम्. G. इदम् for तत्.

19 मुनिः। विमृश्य। कथमित्थमासन्नशत्रौ लङ्केश्वरे तादृशस्य महामन्त्रिणो माल्यवत एवमुपचरितुमुचितम्। तन्नूनं प्रस्तुतोचितमेव किमप्येतद्भविष्यति।

20 नेपथ्ये।

रे रे चन्दनमिन्दुमण्डलशिलापट्टे समुद्घृष्यतां
रे रे चामरमुज्ज्वलैः शशिकरैः श्वेतं विनिर्मीयताम्।
रे रे बालमृणालतन्तुलतिकासूत्रेण पाथोजिनी-
पत्रस्थैरुदबिन्दुभिर्मणिमयो हारः समासूत्र्यताम्॥ ६॥

21 मुनिः। सोपहासमात्मगतम्। यादृशोऽयं शीतोपचारस्तादृश एव सीतोपचारोऽपि लङ्केश्वरस्य भविष्यति। प्रकाशम्। कथमिदं विरहतप्तस्य दशकन्धरस्य शीतोपचारार्थमादिश्यन्ते निशाचराः।

22 करा०। खेचराश्च। इदानीं हि

अङ्गं लिम्पति चन्दनेन मृदुभिः शीतद्युतिः स्वैः करैः
किंचिच्चञ्चलतालवृन्तकलनव्यग्रो वसन्तानिलः।
किंचायं नलिनीदलैर्वितनुते तल्पं प्रतीचीपति-
र्दैवैरित्थमनङ्गतप्तहृदयो लङ्केश्वरः सेव्यते॥ ७॥

23 मुनिः। स्वगतम्। अहो अलीकवाग्डम्बरं निशाचरस्य।

---

19. G. विहस्य. A. आपन्नशत्रौ. G. लङ्केश्वरेण. D. om. महा.

20. D. शिलापत्रे. A. जलबिन्दुभिः.

21. A. B. स्वगतम्. D. E. सीतापचारः. B. C. E. G. om. अपि. B. om. लङ्केश्वरस्य. G. इति after भविष्यति. A. B. लङ्केश्वरस्य विरहतप्तस्य.

22. D. F. चालित for चञ्चल. E. चलनव्यग्रः.

23. D. om. स्वगतम्. All except F. have अये for अहो.

24 करा० । नेपथ्याभिमुखमवलोक्य । अये कथमयं प्रहस्तो राजद्वारमुपसर्पति । तदस्य हस्ते चित्रपटं समर्पयामि । भवानपि समीहितं साधयतु ।

इति निष्क्रान्तौ ।

विष्कम्भकः

ततः प्रविशति रावणश्चित्रपटहस्तः प्रहस्तश्च ।

25 रावणः । स्वगतम् ।

राजल्ललाटफलका कमनीयकूज-
त्काञ्चीगुणप्रणयिनी धृतकेशपक्षा ।
हा किं करोमि मम सा हृदयं प्रविष्टा
नाराचयष्टिरिव पुष्पशिलीमुखस्य ॥ ८ ॥

विमृश्य । अहो कथमद्यापि हठाहरणखिन्नां नितान्तकृशधूसराङ्गीमपि जानकीं जनस्थानस्थितामिवाहमखण्डमण्डनां पश्यामि । अथ वा उचितमिदम् ।

आचान्तकान्तिरुन्निद्रैर्मयूखैरहिमत्विषः ।
धूसरापि कला चान्द्री किं न बध्नाति लोचनम् ॥ ९ ॥

26 प्रहस्तः । अयि देव इदमालोक्यतां चित्तविनोदनं चित्रम् ।

---

24. All except A. B. om. अये. B. अद्य for अयम्. A. E. तस्य for तदस्य. A. F. अर्पयामि & B. G. अर्पयिष्ये. All except A. B. have चित्रहस्तः.

25. D. कमनीयराजत्. B. हृदयं मम सा. D. नाराचयष्टि. C. E. अहम् after कथम्. C. D. E. F. हरधनुर्हरण (C. E. °स्थाम्, D. °स्थानम् & F. स्थानस्थाम्) for our हठाहरणखिन्नाम्. D. om. कृश. C. D. E. F. om. अहम्. A. B. अखण्डित. A. B. D. उन्मुद्रैः for उन्निद्रैः.

26. B. चित्रपटं प्रसार्य. A. B. अये. C. E. विलोक्यतामिदम्. D. °विनोदचित्रम् & F. विनोदं चित्रम्.

27 रावणः । किं पुनरिहालिखितम् ।

28 प्रहस्तः । अयं तावत्तरलतिमिमकरकरालकल्लोलकोलाहलोज्जागरः सागरः ।

29 रावणः । विलोक्य । किमिदमुत्तरेण तरङ्गमालिनमनुतमालखण्डमाखण्डलधनुःसहस्रानुकारि कपिशयति गगनतलम् ।

30 प्रहस्तः । तदिदं सुग्रीवपालितं कपिकुलम् ।

31 रावणः । विहस्य । अयि वालिपालितमिति वक्तव्यम् । भवतु किमनेन । कौ पुनरिमौ कार्मुकधरौ ।

32 प्रहस्तः । तावेतौ रामलक्ष्मणौ ययोरग्रजस्य बाणपातविलसितेन सुग्रीवपालितमधुना कपिकुलम् ।

33 रावणः । अनाकर्णितकेन । कः पुनरयं नितान्तकृशकमनीयतनुरमन्दमन्दराघातनिर्मन्थनोत्थिततरलतरङ्गदूरविक्षिप्तशङ्कराशिरःशेखराधिरोहणकुतूहली कलानिधिरिव तरङ्गमालिनस्तटभुवमधिशेते ।

---

27. D. विलिखितम् & A. F. लिखितम्.

28. D. om. तरल. A. तिमिर & B. G. तिमिनिकर for तिमिमकर.

29. A. अनुगतम् for अनुतमालखण्डम् which D. F. om.

31. A. om. विहस्य. A. अये & C. E. G. अपि for अयि. C. D. E. F. om. भवतु. G. पुनरनेन. A. कार्मुकधारौ.

32. A. G. इमौ for एतौ. C. E. एतयोः for ययोः. A. अनयोः after ययोः.

33. A. आकृति for कृश. A. C. E. अभिघात. A. B. D. मथित & C. E. मन्थ for मन्थन. C. E. F. °उत्थितः & D. उत्थतत्पूर् for उत्थित.° B. om. तरल. C. E. F. तरलतर. D. om. दूर. A. B. नि for वि in विक्षिप्त. C. D. E. F. विक्षिप्तः & राशि (D. श) धर for शङ्कर. A. तटम् only. A. B. अनुशेते. A. इव after °शेते.

34 प्रहस्तः। स एष लङ्कागमनकौतुकी निजकुलगुरुं सागरमुपचरितुं कुशशयनविन्यस्तगात्रः प्रथमो दाशरथिः।

35 रावणः। विहस्य। कथमित्थमेव जानकीलाभकौतुकी सोऽयमस्मानप्युपचरिष्यति।

36 प्रहस्तः। इतो विलोक्यतामयं रामनाराचनिवहनिर्मुक्तवहलानलहेलातरलदीनमीननिकरपरिवारः पारावारः।

37 रावणः। कौ पुनरिमौ ज्येष्ठतापसस्य सादरं वानरवीरैः पार्श्वपरिसरमानीयेते।

38 प्रहस्तः। अयं तावत्सागर एव। अयमपि देवस्यैव। इत्यर्धोक्ते। अथ वा किमस्य बन्धुविरोधिनो नामग्रहणेन।

39 रावणः। कथमयं विभीषणोऽस्मद्विरोधेन राममाश्रयति। भवतु।

निशाचरशिरोरत्नराजिताङ्घ्रिसरोरुहः।
प्रियोऽपि दशकण्ठस्य नैष दर्शनमेष्यति॥ १०॥

किं पुनरिदमक्षरपाङ्क्तिद्वयम्।

---

34. A. B. D. G. एव for एष. D. F. °कुतुकी & G. °कुतूहली. A. °चरितः. A. B. °शयने.

35. All except A. B. have °कौतुकः. A. D. om. अपि.

36. C. E. F. अवलोक्यताम्. D. G. om. निवह. A. B. समुत्थ for निर्मुक्त. C. D. E. F. हेति before हेला.

37. F. om. रावणः.

38. A. om. अयं तावत्. A. B. समुद्र. A. B. C. E. om. एष. A. B. add इति विरमति after ग्रहणेन.

39. A. om. the whole verse. B. G.° शिरोरुहः. C. E. परः; D. पादः; & F. प्रायः for प्रियः. C. D. E. F. एव for एष. Between एष्यति & किं पुनः of ours, C. D. E. F. have प्रह०। सत्यमेतत्। राव०। भवतु; & G. has रावणः। सकौतुकम्.

40 प्रहस्तः । नूनमिदं समुद्रबिभीषणौ प्रति लक्ष्मणस्य वचनद्वयं भविष्यति ।

41 रावणः । एकं तावद्वाचय ।

42 प्रहस्तः । वाचयति ।

त्रासं मुञ्च समुद्र कोपदहनो रामस्य पास्यत्ययं
बन्दीभूतसुरेन्द्रसुन्दरदृशामक्ष्णोरमुद्रं पयः ।
कामं ते मकरीगणो विहरतामेतस्य लङ्केश्वर-
स्त्रीगण्डस्थलपत्रभङ्गमकरीविध्वंसिनः सायकाः ॥ ११ ॥

43 रावणः । अन्यदपि वाचय ।

44 प्रहस्तः । वाचयति ।

अद्यैवास्य बिभीषणस्य शरणापन्नस्य मूर्धानते-
रानृण्याय ददात्ययं रघुपतिर्लङ्काधिपत्यश्रियम् ।
एतस्यैव भुजाविह प्रतिभुवौ सुग्रीवराज्यार्पण-
त्रैलोक्यप्रथमानसत्यचरितौ सर्वे वयं साक्षिणः ॥ १२ ॥

45 रावणः । अहो वाग्डम्बरैकसारता कनिष्ठतापसस्य । भवतु । किं पुनरिदं मध्येसमुद्रमालोक्यते ।

46 प्रहस्तः । स एष कपिकुलोन्मूलितशैलशिखरनिर्मितः ककुत्स्थकुलकीर्तिप्रशस्तिबन्धः सेतुबन्धः ।

---

40. D. अये & F. अयम् for इदम्. D. om. प्रति. A. om. द्वयम्.

42. D. °दृशोरक्ष्णो समुद्रम् (?).

43. D. विहस्य before अन्यदृ.

44. A. G. मूर्ध्नानतेः & B. मूर्ध्न्यानते. B. G. यस्सत्यं (G. आनृण्यं) विदधाति. D. °राज्याश्रियम्. A. °सचरिताः.

45. D. om. एक & puts अस्य after °सारता.

46. A. B. वीरकर & C. E. वीरकुल for कुल. D. F. G. काकुत्स्थ. G. प्रसक्ति for प्रशस्ति. C. E. G. प्रबन्ध for बन्ध.

47 रावणः। अहो चित्रकारस्य चातुरी यदलीकमपि सत्यामिव दर्शितवान्।

48 प्रहस्तः। कथमद्यापीदमलीकमिति संभावना देवस्य।

49 नेपथ्ये। कलकलः।

50 रावणः। किमेतत्।

51 प्रहस्तः।

एषामयं रामचमूचराणां
दर्पोद्धतानां कपिकुञ्जराणाम्।
नवोद्गतानामिव नीरदानां
कोलाहलः कोऽपि समुज्जिहीते॥ १३॥

तदिदं शङ्कितव्यं प्रतिविधातव्यं च।

52 रावणः। आः किमिह शङ्कया प्रतिविधानेन वा। अनेन हि

कोलाहलेनोल्लसता कपीनां
मनो मदीयं मुदमेव धत्ते।
मन्दोदरीनूपुरभूषणानां
महामणीनामिव सिञ्जितेन॥ १४॥

---

47. F. om अहो. D. चित्रकस्य & C. E. G. चित्रकरस्य.

48. C. D. E. F. इय (which D. om.) मलीकसंभावना (F. शङ्का) for इदम...भावना.

49. 50. 51. D. F. om. कलकल ...प्रहस्तः. A. असौ for एषाम्. A. has not दर्पोद्धतानाम् for which D. has पादोद्धुराणाम् & F. दर्पोद्धुराणाम्. D. अपि for कपि & नव्य for नव. All except A. B. repeat प्रहस्तः before तदिदम् &c. A. C. E. F. इह for इदम्. B. G. वा for च.

52. C. E. F. च for वा. D. मन्दोदरीयम् for मनो मदीयम्. F. G. भूषणनूपुराणाम्. A. सिञ्जितानि.

53 प्रविश्य मन्दोदरी । जेदु जेदु देवो ।

54 रावणः । देवि इत आस्यताम् ।

55 मन्दो० । यथोचितमुपविश्याधोमुखी तिष्ठति ।

56 रावणः ।

भुग्नालकं स्मितपराजितचन्द्रलोकं
दृग्लीलया कुवलयाश्रियमादधानम् ।
एतन्मुखं दिविषदामपि दुर्निरीक्ष्यं
तन्वङ्गि मामिव मुधा किमधः करोषि ॥ १५ ॥

57 प्रहस्तः । देव कपिसेनाकोलाहलचिन्तयैव नूनमधरीकृतमुखी देवीति तर्कयामि ।

58 रावणः । आः क एष चिन्ताविषयः ।

इयं लीलालोलाङ्गदभुजलता नीलचिकुरा
समुन्मीलत्तारा कुमुदहसिता चारुनयना ।
प्लवङ्गानां सेना युवतिरिव तारापतिमुखी
ममाग्रे कन्दर्पं प्रकटयितुमद्य प्रभवति ॥ १६ ॥

59 मन्दो० । देव अण्णं पि अत्थि कालणम् । अज्ज हि मए देवस्स

---

53 जयतु जयतु देवः ।

59 देव अन्यदप्यास्ति कारणम् । अद्य हि मया देवस्य शकुननिरूपणार्थं गिरिशिख-

---

53. F. जेदु देवो जेदु देवो.

54. D. om. रावणः.

56. F. आः before भुग्न.° G. °चन्द्रलेखम्. A. आवहानम्. G. इव for अपि.

57. F. कपिकुल.° A. D. °कृतमुखा & C. E. °कृतवती मुखम्.

58. D. F. om. आः. B. C. E. इदानीं हि before इयम्.

59. A. जइ वि for अज्ज हि. D.

सउणणिरूवणत्थं गिरिसिहरगहणगब्भट्ठिदां सबरपल्लीं पट्ठाविदा णिअपरिआरिआ । ताए अ कीए वि सबरकुडुम्बिणीए णिअघरपेरन्तवासिणं केसरिकिसोरअं उल्लावअन्तीए एरिसं वअणं आअण्णिदम् ।

मा होहि णाअवइणो परिहवमेत्तेण गव्वणिव्वूढो ।
वसुहामिमं गिरिसंकडमइंदसरहस्स णन्दणो पत्तो ॥ १७ ॥

60 रावणः । किमिह विषादस्थानम् । अस्मान्प्रत्युदासीनमेवैतत् ।

61 प्रहस्तः । देव अन्यथापि घटमानमिदम् ।

मा भव नाकपतेः परिभवमात्रेण गर्वनिर्व्यूढः ।
वसुधामिमां गिरिसंकटमयीं दशरथस्य नन्दनः प्राप्तः ॥ १८ ॥

62 रावणः । आः केयं निसर्गनिःशङ्के लङ्केश्वरे मयि शकुनोपश्रुतिपरीक्षा ।

रगहनगर्भस्थितां शबरपल्लीं प्रस्थापिता निजपरिचारिका । तया च कस्या अपि शबरकुटुम्बिन्या निजगृहपर्यन्तवासिनं केसरिकिशोरकमुल्लापयन्त्या ईदृशं वचनमाकर्णितम् ।

मा भव नागपतेः परिभवमात्रेण गर्वनिर्व्यूढः ।
वसुधामिमां गिरिसंकटमहेन्द्रशरभस्य नन्दनः प्राप्तः ॥

मज्झसंठिअम् for गब्भट्ठिदाम्. B. F. °ट्ठिदम्. D. सबरपती सह्रा.° C. D. E. om. अ after ताए. F. किंपि for कीए वि. D. °पुरएत्तिवासिणम् & F. °पुरपेरन्तवासिणम् after घर. A. केसर. E. अवलोअअन्तीए. A. संउड (संकुट?) for संकड.

60. A. om. this speech. F. किमिदम्. After एतत् B. G. have तथाहि । मा भव नागपतेः ... संकटमयीं मृगेन्द्रशरभस्य ... प्राप्तः.

61. C. D. E. F. om. देव. G. om. अपि. A. B. घटयति. G. नागपतेः. F. दशरथ°. D. तनयः.

62. F. कोऽयम्. B. om. निसर्ग. D. om. निःशङ्के. A. लङ्केश्वरेऽपि. C. E. °उपश्रुतिः only.

63 नेपथ्ये ।

हेलास्फालितरामलक्ष्मणधनुर्ज्यावल्लरीझल्लरी-
झङ्कारप्रसरप्ररूढपुलकप्राग्भारनीरन्ध्रिताः ।
व्यावल्गत्कपिकण्ठकाण्डकदनक्रीडत्कृपाणाञ्चल-
स्फूर्जद्दुर्जयदोर्बलैकचपलाश्चञ्चन्ति रात्रिचराः ॥ १९ ॥

64 रावणः । सहर्षम् । अये निशाचरवीरविजयोत्तरः समरः ।

65 पुनर्नेपथ्ये ।

अग्रेसरी रघुपतेः परिणद्धपाक-
किम्पाकपाटलमुखी कपिवीरसेना ।
निःशेषमापिबति राक्षसवीरचक्रं
प्रातःप्रभेव तपनस्य तमिस्रजालम् ॥ २० ॥

66 रावणः । आः कथमुत्कण्ठायितं मर्कटैः । उच्चै । कः कोऽत्र भोः । मदाज्ञया

कृत्वा विनिद्रमपनिद्रभुजावलेपः
प्रोद्दामरामसमराय स कुम्भकर्णः ।
आदिश्यतां निजभुजाजितवज्रपाणि-
रद्यैव लक्ष्मणरणाय च मेघनादः ॥ २१ ॥

67 नेपथ्ये । देव भवदाशयविदा महामन्त्रिणा माल्यवता पूर्वमेव संविहितमिदम् । इदानीं हि

---

63. A. व्यावल्गत्कीसंभव. C. D. E. F. झाङ्कार. A. has not पुलक. D. व्यावर्तत्कपि°. A. °कदने.
64. B. om. रावणः. C. E. °विक्रमोत्तरः.
65. A. B. अग्रेसरा.

66. C. E. repeat कः कोऽत्रभोः. A. अवलेश°. A. भुजाजित, B. G. भुजार्जित, & D. शरौर्जित. C. E. तत्रैव. A. D. F. स for च.
67. B. प्रहस्तः & A. G. पुनः before नेपथ्ये. D. om. देव. D.

रामेण सार्धमयमुद्धतबाहुदर्पः
संग्राममूमिमधितिष्ठति कुम्भकर्णः।
रक्षःशिखण्डिहृदयोत्सवमेघनादः
सौमित्रिणा सममसावपि मेघनादः ॥ २२ ॥

पुनर्नेपथ्ये।

यद्दंष्ट्रावज्रघातैः समिति विदलिताः शैलकल्पाः कपीन्द्रा
यन्नाराचाम्बुवर्षैर्दवदहनसमाः शामिता वानरेन्द्राः।
वीरोऽसौ कुम्भकर्णः स च समरकलाकौतुकी मेघनादः
संजातौ

68 रावणः। किमतः परं वदिष्यति।

69 पुनर्नेपथ्ये।

हा पतङ्गौ दशरथसुतयोर्दारुणे बाणवह्नौ ॥ २३ ॥

मन्दोदरीरावणौ मूर्छतः।

70 प्रहस्तः। देव समाश्वसिहि समाश्वसिहि।

71 रावणः। समाश्वस्य। देवि समाश्वसिहि समाश्वसिहि।

72 मन्दो०। समाश्वस्य। परित्ताअदु मं अज्जउत्तो। एसा णिमग्गम्हि सोअतिमिरे।

---

72 परित्रायतां मामार्यपुत्रः। एषा निमग्नास्मि शोकतिमिरे।

संहितम् & F. विहितम्. A. दर्प°. F. शान्तिताः for शामिताः. D. F. धीरोऽसौ.

68. A. om. this speech & reads 69 in continuation of संजातौ of 67. C. E. F. सविषादम्.

69. All except G. om. पुनर्नेपथ्ये. A. मूर्च्छितौ पततः.

70. A. D. F. om. one समाश्वसिहि.

71. A. om. समाश्वस्य. B. D. F. om. one समाश्वसिहि.

73 रावणः। अयि अलं कातरतया। अयं चन्द्रहासचन्द्र एव शोकतिमिरादुद्धरिष्यति भवतीम्। उत्थाय खड्गमुत्पाट्य। पश्य अयमसौ मे

भिन्नप्रभिन्नसुरकुञ्जरकुम्भमुक्त-
मुक्ताफलप्रकरकैः कलिताधिवासः।
अद्यैव खेचरनिशाचरलोचनाना-
मुन्मीलयन्मुदमुदञ्चति चन्द्रहासः॥ २४॥

इति प्रहस्तेन सह निष्क्रान्तः।

74 मन्दो॰। अये अच्चरिअं। समरसंरम्भविलोअणविम्हअत्थिमिदमिदं विज्जाहरमिहुणं किंपि मन्तेदि। तेण हि अज्जउत्तविजअत्थं अहं पि णिअकुलदेवदाओ अच्चिदुं गच्छम्मि। इति निष्क्रान्ता।

ततः प्रविशति विद्याधरमिथुनम्।

75 विद्याधरः। प्रिये पश्येदम्।

रणे मुक्तप्राणा रजनिचरवीरा दिनमणिं
विशन्तः शोभन्ते कमलमिव सायं मधुलिहः।

---

74 अये आश्चर्यम्। समरसंरम्भविलोकनविस्मयस्तिमितमिदं विद्याधरमिथुनं किमपि मन्त्रयते। तेन हि आर्यपुत्रविजयार्थमहमपि निजकुलदेवता अर्चितुं गच्छामि।

---

73. D. शोकसमुद्रात्. All except A. B. put पुनः before उत्थाय. C. E. उत्पाद्य & G. उद्यम्य. D. F. om. मे. A. B. have अयमसौ मे पश्य (B. one more पश्य). A. मुक्ताफलैर्विरचितैः.

74. A. om. अये & repeat अच्चरिअम्. D. विम्हअत्थं. A. F. om. इदम्. B. C. E. किंपि किंपि. D. F. om. हि. A. B. G. अज्जउत्तस्स. A. B. °देवदाम्. C. D. E. F. वज्जामि.

75. A. G. have not this speech, while D. puts it after 76, omit-

अथामीभिर्भिन्नं गगननवकुञ्जोदरदरी-
मयच्छत्रच्छायामनुभवति बिम्बं दिनकृतः ॥ २५ ॥

76 विद्याधरी । अज्जउत्त को इमो रणरहसविअसन्तपुलअभरकुड्डमलिदभुअवणो कविचमूचक्कं अहिवट्टदि ।

77 विद्याधरः । स एष रामसमरकौतुकी दशकण्ठः ।

78 विद्याधरी । को उण एसो अञ्जणपुञ्जच्छविसरीरो कविवीरो तस्स संमुहं परावट्टदि ।

79 विद्याधरः । प्रिये स एष विचित्रसमरशीलो नीलः । विलोक्य सविस्मयम् । अहो

वक्षःस्थले झटिति नीलकरोज्झितेन
नीलाचलस्य शिखरेण कृतप्रहारः ।
लङ्केश्वरः स्मरति नूनमसौ वतंस-
नीलोत्पलप्रहरणं हरिणेक्षणानाम् ॥ २६ ॥

पुनः सकौतुकम् । पश्य पश्य ।

नीलोऽयं दशमुखपाणिपङ्कजाना-
मङ्केषु भ्रमरतुलां भ्रमन्बिभर्ति ।

---

76 आर्यपुत्र कोऽयं रणरभसविकसत्पुलकभरकुड्मलितभुजवनः कपिचमूचक्रमभिवर्तते ।
78 कः पुनरेषोऽञ्जनपुञ्जच्छविशरीरः कपिवीरस्तस्य संमुखं परावर्तते ।

---

ting विद्याधरः of 77. All except B. read एवम् for इदम्. B. D. F. वन for नव. C. E. F. मधु for मय.
76. C. E. F. हरस & D. रस for रहस. A. B. om. भर. D. कुण्डलित.
77. B. G. प्रिये before स. C. D. E. F. om. राम.
78. B. om. उण. A. F. इमो उण. A. B. अहिवट्टदि.
79. A. om. समर. A. B. स एष after वि... शीलः instead of before it. A. om. अहो. B. किमिति for

अप्येको दशसु किरीटपीठिकासु
द्राक्प्रेङ्खन्ननुभवतीन्द्रनीललीलाम् ॥ २७ ॥

80 विद्याधरी । को उण इमो णिसाअरो णिसाअरेन्देण समं समरसाहसमङ्गीकरिअ चिठ्ठदि ।

81 विद्याधरः । स एष स्वामिपक्षपाती बिभीषणः । सविषादम् । हन्त भोः

येयं बिभीषणे मुक्ता शक्तिः क्रूरेण रक्षसा ।

82 विद्याधरी । अह किं ताए ।

83 विद्याधरः ।

लक्ष्मणेन गृहीतेयं प्रियेव निजवक्षसा ॥ २८ ॥

84 विद्याधरी । हद्धि हद्धि ।

85 विद्याधरः ।

वर्षन्नेष समन्ततो दशमुखं चापच्युतैः सायकैः
सौमित्रिं च विसंज्ञमङ्कनिहितं नेत्रच्युतैरम्बुभिः ।

---

80 कः पुनरयं निशाचरो निशाचरेन्द्रेण समं समरसाहसमङ्गीकृत्य तिष्ठति ।

82 अथ किं तस्याः ।

84 हा धिक् हा धिक् ।

झटिति. A. B. D. करोद्धूतेन. A. B. D. G. वसन्त for वतंस. C. E. हरिणेक्षणायाः. D. F. om. one पद्य. D. पादिकासु.

80. A. om. उण. D. F. G. om. णिसाअरो.

81. D. F. om. स. C. D. E. F. पुनः before सविषादम्. A. om. हन्त भोः. B. G. शक्तिर्मुक्ता.

85. A. B. D. F. एव for एष. A. श्यामलशौर for चामलकोलि. C. E. वीरकोलि. All except A. have करुणा. D. वाहते. B. शर for बाण.

एतत्तर्कय हर्षशोकतरलाः कुर्वन्कपीनां दृशो
रामश्रामलकेलिवीरकरुणव्यामिश्रतां गाहते ॥ २९ ॥

विलोक्य । कथमपगत एव रामबाणपीडितो दशकण्ठः ।

86 नेपथ्ये ।

हा वत्स लक्ष्मण विकासय नेत्रपद्मे
मागादिदं युगपदेव समस्तमस्तम् ।
भाग्यं दिवाकरकुलस्य च जीवितं च
रामस्य किं च नयनाञ्जनमूर्मिलायाः ॥ ३० ॥

87 विद्याधरः । हन्त सोऽयमनुजवत्सलस्य रामस्य विलापः ।

88 नेपथ्ये । देव समाश्वसिहि समाश्वसिहि ।

89 विद्याधरी । कहं सुग्गीवेण समासासीअदि रामचन्दो । ता किं दाणिं आलविस्सदि ।

90 विद्याधरः । आकर्णयावस्तावत्सुग्रीवेण समाश्वास्यमानः किमाह राघवः ।

---

89 कथं सुग्रीवेण समाश्वास्यते रामचन्द्रः । तत्किमिदानीमालपिष्यति ।

---

86. A. has not °ण विकासय. D. पद्मनेत्रे.
87. A. om. रामस्य.
88. A. D. one समाश्वसिहि.
89. A. C. E. F. om. this speech, D. किं पि.

90. F. om. विद्याधरः. A. D. G. आकर्णयामः. A. B. D. सुग्रीव (A. वं) समाश्व (B. श्वा) स्यमानः. C. E. आश्वास्यमानः. B. F. रामः (B. °भद्रः) किमाह. For राघवः A. has रामभद्रः, D. रामचन्द्रः, & G. रामः.

91 नेपथ्ये । सखे सुग्रीव कथं समाश्वस्यते ।

अयि राघवाविति सुधामधुरं
विनिपीय पौरमुनिलोकवचः ।
अयि राघवेति गरलप्रतिमं
कथमद्य रामहतकः पिबतु ॥ ३१ ॥

अपि च ।

कनीयस्या मातुः कृतचरणपातः कथमहं
सहिष्ये मत्पार्श्वे विफलपरिवर्तं नयनयोः ।
अये शान्तं पापं कठिन इति चेज्जीवति मना-
ग्विना वत्सं रामः कथमयमयोध्यां प्रविशति ॥ ३२ ॥

92 विद्याधरः । अहह करुणैकार्णवो वर्तते । विमृश्य । कः पुनरिह प्रतीकारः । विचिन्त्य । अथ वा का प्रतीकारकथा । वक्रो हि विधिः ।

93 विद्याधरी । वक्कदरोत्ति भणिदव्वं । इदो पेक्ख । णं इमो वाणरो जेव्व कोवि लङ्केसरकिदसंधाणो करकलिदसेलसिहरो रामसंमुहं जेव्व परावट्टदि ।

---

93 वक्रतर इति भणितव्यम् । इतः प्रेक्षस्व । नन्वयं वानर एव कोऽपि लङ्केश्वरकृतसंधानः करकलितशैलशिखरो रामसंमुखमेव परावर्तते ।

---

91. D. F. G. आश्वास्यते. A. अपि for इति ; परिपीय ; & पिबतु. A. om. अपि च. A. B. G. इव for इति. A. B. D. G. जीवितुमना:. A. B. F. G. पुनः for कथम्.

92. D. om. अहह ... वर्तते. B. अत्र for इह. C. D. E. परिहारः for प्रतीकारः. B. om. विचिन्त्य & puts वा after का. D. परिहार° for प्रतीकार°.

93. All except A. E. read भणिज्जम्. A. B. विलोकय before इदो. G. इदम्. C. E. गिरि for सेल. D. रामस्स. D. F, G. परिवट्टदि.

94 विद्याधरः । कर्णौ पिधाय । शान्तं पापं शान्तं पापम् । अयि मुग्धे मैवं वादीः । अयं हि

महौषधीनामाधारं भूधरं गन्धमादनम् ।
आदाय लक्ष्मणप्राणत्राणायाभ्येति मारुतिः ॥ ३३ ॥

पुनर्विलोक्य सहर्षम् ।

आमोदमाघ्राय महौषधीनां
सौमित्रिरुन्मीलितनेत्रपद्मः ।
भूयोऽपि चक्रीकृतचारुचापः
करोति रामं परिपूर्णकामम् ॥ ३४ ॥

95 विद्याधरी । कहं पुणोवि रामरणकोदूहलफुल्लन्तभुअदण्डमण्डलो णिसाअराखण्डलो परावट्टिदो जेव्व ।

96 विद्याधरः । प्रिये तदिदानीं सावधानमवलोकय । तुलाधिरोहः खल्वयं वीरलक्ष्म्या यन्नाम रामरावणयोः समर इति ।

---

95 कथं पुनरपि रामरणकौतूहलफुल्लद्भुजदण्डमण्डलो निशाचराखण्डलः परावर्तित एव ।

---

94. B. G. have शान्तं पापम् only once. Between मारुतिः & पुनर्विलोक्य F. has विद्याधरी । ता- जीविदम्हि । विद्याधरः. A. पश्य पश्य & B. पश्य after सहर्षम्. G. पद्म- नेत्रः & रामः.

95. A. D. रामो & B. रामस्स. A. समर for रण which B. om. A. B. कोदूहलं सुणिअ फुरन्त°. A. B. D. G. om. दण्ड. D. णिसाअरखण्डणो. C. D. E. F. परा (D. F. परि) वह- ट्टि. G. परावड्डिदो. A. B. परावट्टि- दो जेव्व णिसाअराखण्डलो.

96. D. तदानीम्. A. इतस्ततः for इदानीम्. D. F. G. विलोकय. C. E. om. नाम.

97 विद्याधरी। कहं उण सअललोएक्कवीरस्स रामचन्दस्स अणेअवीरपरिहूदस्स रावणस्स तुलाधिरोहो वीरलच्छीए हविस्सदि।

98 विद्याधरः। प्रिये न जानासि। कथय विना दशकण्ठम्

विन्यासं नाकनारीकुचकलशलसत्कुङ्कुमस्थासकाना-
मस्पृष्ट्वा मार्ष्टुमासीदसिकलहकलाकोविदः को विदग्धः।
भिन्नस्वर्गेभकुम्भस्थलबहलगलन्मौक्तिकव्यक्तहासः
कस्याक्रीडत्कराग्रे त्रिदशपतियशश्चन्द्रहा चन्द्रहासः॥ ३५॥

अपि च।

किं ब्रूमो दशकन्धरं निजचमूरक्षाकपाटीभव-
द्वक्षःपीठपतत्कठोरकुलिशाघातेषु जातस्मितम्।
व्योमाभोगसरोविलासिनि वने यत्पाणिपङ्केरुहां
कैलासेन शिरःस्थितेन्दुकलिकोत्तंसेन हंसायितम्॥ ३६॥

99 नेपथ्ये।

हेलोन्मूलितचन्द्रचूडगिरयस्त्रैलोक्यदत्तापदो
लङ्कातङ्कहराः पुरन्दरपुरस्त्रीवृन्दबन्दीकृताः।

---

97 कथं पुनः सकललोकैकवीरस्य रामचन्द्रस्यानेकवीरपरिभूतस्य रावणस्य तुलाधिरोहो वीरलक्ष्म्या भविष्यति।

---

97. B. D. F. G. om. एक. A. B. D. F. रामस्स. C. D. E. F. परिहवस्स. E. रावणस्स वि. A. समर° & B. समरो before तुला°.

98. B. C. E. F. G. कथं दशकण्ठं (G. विना). A. कलभ for कलह. C. दशास्यम् & E. दशास्यात् for विदग्धः. A. कः स्यात् for कस्या°. A. वक्षः for रक्षा & पीन for पीठ. B. कठोरपीत for पतत्कठोर. C. E. F. °घातेऽपि.

99, B. लब्धोत्सवाः for बद्धस्पृहाः.

वैदेहीकुचकुम्भकुङ्कुमरसव्यासङ्गबद्धस्पृहाः
सोत्कर्षं दशकन्धरस्य जयिनः खेलन्ति दोःकेलयः ॥ ३७ ॥

100 पुनर्नेपथ्ये ।

हेलोन्मूलितचन्द्रचूडधनुषस्त्रैलोक्यदत्ताभया
लङ्कातङ्ककराः पुरन्दरपुरस्त्रीवृन्दबन्दीमुचः ।
वैदेहीकुचकुम्भकुङ्कुमरसव्यासङ्गलब्धोत्सवाः
सोत्कर्षं दशकन्धरस्य जयिनः खेलन्ति दोःकेलयः ॥ ३८ ॥

101 विद्याधरः । नूनमयं राक्षसवानराणां निजस्वामिवर्णनानुसारी व्याहारः ।

102 विद्याधरी । कहं उण रहट्ठिदेण रावणेन समं भूमिट्ठिदस्स राहवस्स समरो हविस्सदि ।

103 विद्याधरः । प्रिये पश्य । आनीत एव मातलिना पुरुहूतरथः । अधिष्ठितश्च विनयाभिरामेण रामेण ।

104 नेपथ्ये । अये कथम्

पूर्वमेव प्रयातानां खरमारीचवालिनाम् ।
सौजन्यमुग्धः पन्थानमनुवर्तितुमीहसे ॥ ३९ ॥

---

102 कथं पुना रथस्थितेन रावणेन समं भूमिस्थितस्य राघवस्य समरो भविष्यति ।

D. F. G. सोत्कण्ठम् for सोत्कर्षम्.

100 D. om पुनः. A. D. बद्धोत्सवाः. D. सोत्कण्ठम्.

101. D. F. G. °वानरयोः. A. D. व्यवहारः.

102. C. E. om. समम्. B. रामस्स.

103. A. B. विलोक्य before प्रिये A. B. C. E. om. प्रिये. F. om. पश्य but C. E. repeat it. A. B. अयम् before आनीतः. A. B. D. F. विनयारामेण.

104. D. अथ for अये & °मुग्धम्. All except A. B. have अधिवर्तितुम्.

105 विद्याधरः । आकर्णयावस्तावदनेन रामवचनेन पीडितः किमाह रावणः ।

106 नेपथ्ये ।

खरः कीदृग्वाली कपिरपि च मारीचहतकः
कुरङ्गस्तान्हत्वा कथमपि कथं दृप्यसि मनाक् ।
अयं पश्य प्राप्तो दशवदननामा सुरपुरी-
करीन्द्राणां हेलारचितकदनः पञ्चवदनः ॥ ४० ॥

अथ वा ।

कालीकेसरिकेसराञ्चलसटासाटोपसंपादित-
क्रीडाचामरकोमलानिलवाचान्तश्रमाम्भःकणः ।
श्रीमानेष दशाननो विजयते तस्यास्य पञ्चानन-
व्यापारप्रतिपादनैरपि यशः कीदृक्समुन्मीलति ॥ ४१ ॥

107 विद्याधरः । अये दशवदनवचनकुपितः किमपि वक्तुकाम इव लक्ष्यते लक्ष्मणः ।

108 नेपथ्ये । किं ते पञ्चाननतया दशाननतया वा । त्वमिदानीम्

दूरोन्मुक्तमदो बिभीषण इव न्यस्तच्छिरःशेखरः
स्वच्छन्दं चरणारविन्दयुगले रामस्य भृङ्गो भव ।
रे नक्तंचर कुम्भकर्ण इव वा कर्णान्तचक्रीभव-
च्चापोत्सङ्गविमुक्तबाणदहने सद्यः पतङ्गो भव ॥ ४२ ॥

---

105. F. G. आकर्णयामः.
106. C. E. पुनर्नेपथ्ये. A. कथयसि for कथमपि. C. D. E. हृष्यसि for दृप्यसि. D. सुररिपुः कर्पी°. A. °केसराचल. A. C. E. यस्यास्य.

107. D. F. om. अये.
108. G. om. ते. A. D. om. वा. A. B. हि after इदानीम्. A. दूरात् & न्यस्यत्.

109 विद्याधरी । पेक्ख पेक्ख । णं इदो सरन्धआरं वित्थारअन्तेण णिसामुहायिदं दसमुहेण ।

110 विद्याधरः । नन्वितस्तदेव निशितविशिखमयूखधारया निवारयता चन्द्रायितं रामचन्द्रेण । पुनः सकौतुकम् । अये नूनमयं दिव्यास्त्रलीलया प्रतिहतदिव्यास्त्रं निकृत्तचापं रावणं किमपि वक्तुकाम इव दृश्यते रामः ।

111 नेपथ्ये ।

निकृत्तचाप इति मा संतापतरलो भव ।
शस्त्रमन्यदपि स्वैरं समरे समलङ्कुरु ॥ ४३ ॥

112 विद्याधरी । आकण्णीअदु दाव किं दाणिं भणादि रावणो ।

113 नेपथ्ये ।

आकर्णितस्तव दशाननबाहुदण्ड-
श्रीखण्डकाननफणीव न चन्द्रहासः ।

---

109 प्रेक्षस्व प्रेक्षस्व । नन्वितः शरान्धकारं विस्तारयता निशामुखायितं दशमुखेन ।
112 आकर्ण्यतु तावत्किमिदानीं भणति रावणः ।

---

109. E. णूणं for णं which D. F. G. om. B. सरन्धआरअं. E. णिसाअरेण before णिसामुहा.

110. A. देवि for तदेव. All except A. B. read निज for निशित. B. om. विशिख. D. G. om. मयूख. A. निचयैः & B. चयैः for धारया. F. G. विनिवारयता. D. F. चन्द्रायितं रामचन्द्रेण निवारयता. A. C. E. om. अये. C. E. om. प्रति. A. B. सकल after प्रतिहत. A. °अस्त्रनिकृत्त. G. कमपि. D. एव for इव. B. लक्ष्यते for दृश्यते which D. F. G. om.

111. A. B. G. संक्षोभ. D. शील for तरल. A. B. D. G. ननु रे समरे for समरे समलम्. D. reads the second line thus:—अन्यदस्त्रमपि स्वैरं ससख्यमलङ्कुरु.

112. F. आकत्तिअदु. C. E. दाणिं किं.

113. C. E. F. °फणी नव°. B. G. भव for पव. G, एव for इव. C.

येन स्वनामपदसाम्यरुषेव पीतः
स्वर्लोकलोलनयनामुखचन्द्रहासः ॥ ४४ ॥

114 विद्याधरः । लीलादलितचन्द्रहासः सोल्लासः किमधुना वदति रावणं रामचन्द्रः ।

115 नेपथ्ये । अयि तावदधुना लङ्केश्वरः खिद्यते ।

116 विद्याधरी । किं दाणिं जम्पिस्सदि रावणो ।

117 नेपथ्ये । कथमधुनैव खिद्यते लङ्केश्वरः । ननु रे

विध्वस्ता दशभिर्भुजैर्दश दिशः प्रत्येकमेते पुन-
र्भारायैव दशापरे मम गिरिप्राग्भारभाजो भुजाः ।
आराध्यः शशिमौलिरम्बुधिजले निद्राति नारायणः
किंकर्तव्यतयानयानुदिवसं लङ्केश्वरः खिद्यते ॥ ४५ ॥

118 विद्याधरी । वअणमेत्तं दाणिम् ।

119 विद्याधरः । न हि न हि । पश्य । नन्वयमिदानीमपि

धनुर्निस्त्रिंशादिप्रहरणगणच्छेदकुपितो
दशास्यः स्वान्मूर्ध्नो रघुपतिशरश्रेणिदलितान् ।

---

116 किमिदानीं जल्पिष्यति रावणः ।
118 वचनमात्रमिदानीम् ।

E. F. ललना for ०नयना०. D. F. आनन for मुख.
114. A. om. सोल्लासः. D. F. स before किम्. C. E. वक्ष्यते & D. F. वक्ष्यति. C. D. E. F. om. रावणम्.
115. A. F. अपि for अयि.
116. C. om. this speech. A. G. किंपि. E. भणदि.
117. C. om. नेपथ्ये ...लङ्केश्वरः. A. किम् for कथम्. C. E. G. अद्यैव लङ्केश्वरः खिद्यते. A. खिद्यति. D. अम्बुधितले.
119. F. G. one more पश्य. A. om. अयम्. G. has not one एकैः.

कैरंकैरेकैर्नभसि भृशमादाय युगप-
त्क्षिपन्नन्यैरन्यैः सफलयति दोर्विंशतिमपि ॥ ४६ ॥

पुनः सकौतुकम् ।

एतान्यस्य यथा यथा सुविशिखैः कृत्तानि रक्षःपते-
रुद्गच्छन्ति शिरांसि भीतिपुलकैः साकं दिवौकःपतेः ।
उन्मीलन्ति तथा तथा रघुपतेरन्तःप्रमोदोर्मयः
कण्ठच्छेदविनोदकौतुकभरव्यग्रीभवच्चेतसः ॥ ४७ ॥

120 विद्याधरी । कहं अज्जवि णिसाअरेन्दवन्दीकिदसुरसुन्दरीणं दंसणं दुल्लहं जं इमस्स सीसाइं पुणो पुणोवि उम्मीलन्दि ।

121 विद्याधरः । अलं तापेन । क्रीडति खलु रामः सह रावणेन । न पुनरद्यापि कुप्यति । पुनर्विलोक्य सकौतुकम् । प्रिये पश्य पश्य ।

अन्तःसान्द्रवसन्महेश्वरशिरःशीतांशुलेखोल्लस-
त्पीयूषद्रवशीकरव्यतिकरप्राग्भारभाजामिव ।
छिन्नानामपि रामचन्द्रविशिखैर्भूयः समुद्गच्छतां
काप्यन्यैव निशाचरेन्द्रशिरसां कान्तिः समुज्जृम्भते ॥ ४८ ॥

---

120 कथमद्यापि निशाचरेन्द्रवन्दीकृतसुरसुन्दरीणां दर्शनं दुर्लभं यदस्य शीर्षाणि पुनः पुनरप्युन्मीलन्ति ।

C. E. सार्धम् for साकम्. A. यथा तथा.

120. D. om. कहम्. C. E. जणो & F. जणो वि after कहम्. D. om. वि after अज्ज. A. D. F. संदंसणम्. A. om. वि.

121. A. B. C. E. om. प्रिये. D. F. one पश्य. G. सान्द्रवहन्. A. महेन्द्रशिरसः & लेखोच्छलत्. A. प्राग्भश्य, B. C. E. प्रागल्भ्य, & D. प्राग्भाग for प्राग्भार. F. अपि for इव. B. रामभद्र & निशाचरास्याशिरसाम्. A. B. om. विहस्य. G. °पीठो & om. मुहम्. D. देहे for देवी. A. B. जनकनृप.

पुनः सकौतुकं विहस्य । अहो अस्य चित्तवृत्तिः ।

अयं यावद्यावत्पृथुहृदयपीठं रघुपतिः
शिरश्छेदासक्तो न दशवदनस्य व्यथयति ।
अयं तावत्तावद्वहति मुदमुच्चैर्दशमुखः
क्वैतस्मिन्देवी जनकपतिपुत्री निवसति ॥ ४९ ॥

122 नेपथ्ये । अये राम

किं क्रीडसि शरस्तोमैरनेकेनैव पत्रिणा ।
परिपूरय नः कामं यशसा च जगत्त्रयम् ॥ ५० ॥

123 विद्याधरः । नूनममी दिवौकसस्त्वरयन्ति रामचन्द्रम् । तच्छृण्वन्किमधुना वक्ष्यति रावणः ।

124 नेपथ्ये । रे रे मम भुजाः

मुक्त्वैकां हरशेखरप्रणयिनीं पीयूषभानोः कलां
दिक्पालावलिमौलिमण्डनमणीन्गृह्णीत सर्वानपि ।
तैः काञ्चीं रचितां चिराय वहतु श्रोणीतटे जानकी
गायन्ती कमनीयगुञ्जितभरैर्मद्विक्रमाडम्बरम् ॥ ५१ ॥

125 विद्याधरः । विहस्य । अये लङ्केश्वर समयज्ञोऽसि यद्भुजानेव नियुक्तवानसि । अधुना हि भुजमण्डलमेव परिवारवर्गस्ते । विलोक्य

123. B. रामभद्रम्. C. E. श्रुत्वा for शृण्वन् which D. om.
124. D. om. नेपथ्ये ... भुजाः. C. रावणः for नेपथ्ये. A. B. अये for रे रे. A. B. F. भुजदंडाः (A. °ड) for मम भुजाः, after which C. E. add यूयम्. D. शशिशेखर. A. has not मौलि. A. B. भूषणमणीन्. A. B. G. सिञ्जितभरैः. A. °डम्बरीम्.
125. C. E. G. om. अये. C. E. put ते after हि instead of after °वर्गः which D. om. A. B. सकौतुकम्. A. B. किम् for कथम्. A. अनेनैव & om. दशानन. C. E. किमपि for

साकूतम्। अये कथमनेन दशाननवचनेन किंचित्कुपित इव दृश्यते जानकीकान्तः। पुनः सहर्षविषादम्। हन्त भोः

विकचकुसुमस्तोमाकीर्णे परागविभूषितः
शशिमणिशिलातल्पेऽनल्पे सलीलमशेत यः।
अयमयमसौ रोषारूढे क्षणं रघुनन्दने
भुवि दशमुखः शेते धूलिच्छटापरिधूसरः॥ ९२॥

126 विद्याधरी। सहर्षम्। ता दाणिं जेव्व जणअणन्दिणी रामचन्द्रेण समं संगमिस्सदि।

127 विद्याधरः। अथ किम्। विलोक्य। नन्वियमसौ

उद्दामहेतिवलयैः परिदीपिताशं
पश्य प्रविश्य जनकेन्द्रसुता हुताशम्।
अभ्युद्गता समधिकां द्युतिमुद्वहन्ती
प्रातर्मयूखकलिकेव दिवाकरस्य॥ ९३॥

128 विद्याधरी। पेक्ख पेक्ख इमो असमसमरकअत्थिदं पदेसं अवतरइ रामचन्दो।

---

126 तदिदानीमेव जनकनन्दिनी रामचन्द्रेण समं संगमिष्यते।
128 प्रेक्षस्व प्रेक्षस्व। अयमसमसमरकदर्थितं प्रदेशमवतरति रामचन्द्रः।

किञ्चित्. D. एव for इव. C. E. लक्ष्यते for दृश्यते which D. F. om. D. F. om. हन्त भोः. C. D. E. चिकुर for विकच. C. E. F. स्तोमास्तीर्णे. A. B. तल्पेनाल्पे. A. क्षणे.
126. A. सदाणिम् & जणअराअ°.
127. D. G. om. विलोक्य... असौ. A. om. विलोक्य. F. om. असौ. A. हेमवलयैः. D. F. G. प्रत्युद्गता. G. आवहन्ती. A. प्रात्यामयूख°.
128. F. om. one पेक्ख. A. B. इमो (B. अम्मो) संपरिवालो (B. अअं) समरभूमिं उत्तरइ, & D. असमसमरकअं पदेसं ओदरदि (?) for इमो ... अवतरइ.

129 विद्याधरः। तदेहि कर्णामृतमिदं पुलोमजायै निवेदयावः।

इति निष्क्रान्तौ।

ततः प्रविशति रामः सीतालक्ष्मणौ सुग्रीवविभीषणौ च।

130 रामः। अये कथमुपगत एव भगवानम्बरमणिश्चरमाचलचूडाम्।

131 लक्ष्मणः। पश्चिमपयोधिवेलां च। नन्विदानीम्

उद्दामदिग्द्विरदचञ्चलकर्णपूर-
गण्डस्थलोच्चलदलिस्तबकाकृतीनि।
मीलन्नभांसि मृगनाभिसमानभांसि
दिक्कन्दरेषु विलसन्तितमां तमांसि॥ ९४॥

132 रामः। अये कथमुज्जृम्भितमेव निशाचरचक्रानुकारिणा तिमिरनिकरेण।

133 विभीषणः। नन्वितोऽपि समुन्मीलितमेव रामनाराचनिकुरम्बकुटुम्बिना तुहिनकरकिरणकदम्बकेन।

134 सुग्रीवः। एवमेतत्। अमी हि

क्षीराब्धेर्लहरीषु फेनधवलाश्चन्द्रोपलेषु स्रव-
त्पाथःशीकरिणो विकासिकुमुदक्रोडे रजःपिञ्जराः।

---

129. C. D. E. F. om. तत्. All except A. om. इदम्. B. om. सीता ... च.

130. A. B. D. G. have not रामः. A. D. उपागतः. A. चरमाचलं पश्चिमपयोधिवेलां च. B. G. °चूडम्.

131. A. om. here पश्चिम...च. C. E. इदानीं हि for नन्विदानीम्. C. D. E. F. विकसन्ति.

132. A. om. अये. D. °अनुसारिणा.

133. C. om. this speech & the following. D. om. एव. All except A. B. om. निकुरम्ब. E. G. अनुकारिणा for कुटुम्बिना. A. B. D. E. कदम्बकेन & F. कदम्बेन for प्रकरेण.

134. D. F. om. एवमेतत् for which E. के. D. क्षाराब्धेः. E. F.

उन्मीलन्ति चकोरचञ्चुगहने च्छिन्नप्ररूढाश्रम-
त्कुर्वन्तः प्रियविप्रयुक्तरमणीगात्रे सुधांशोः कराः ॥ ९५ ॥

135 विभी०। एवमेतत्। इदानीं हि

शङ्करार्धतनुबद्धपार्वती-
कुङ्कुमाक्तकुचकोरकाकृतिः।
सूच्यते कमलिनीभिरुन्नम-
त्पद्मकोशकरलीलया शशी ॥ ९६ ॥

136 लक्ष्मणः। सकौतुकम्। अहो

ध्वान्तौघे शितिकण्ठकण्ठमहसि प्राप्ते प्रतीचीमुखं
प्राचीमञ्चति किंच दुग्धलहरीमुग्धे विधोर्धामनि।
एतत्कोकचकोरशोकरभसम्लानप्रसन्नोच्छ्स-
द्दृक्पातोर्मिकदम्बचुम्बितमिव त्रैलोक्यमाभासते ॥ ९७ ॥

137 रामः। एवमेतत्। इदानीं हि

शीतांशुस्फटिकालवालवलयद्रागुच्छलत्कौमुदी-
वल्लीनूतनपल्लवाञ्चितमिव प्राप्य क्षणं ताम्रताम्।
चञ्चन्मत्तचकोरचञ्चुघटनाच्छिन्नाग्रकाण्डस्रुत-
क्षीरस्यन्दनिरन्तराप्लुतामिव श्वेतं वियद्भासते ॥ ९८ ॥

चञ्चुकुहरे. A. प्ररूढाश्रमम् & प्ररोहास्तमः. D. वनिता for रमणी.

135. A. gives this speech to राम. A. B. विलोक्य. A. om. एवमेतत्. D. एवमेव तत्. C. D. E. F. om. इदानीं हि. C. E. तनुनद्ध. D. कुचकुङ्कुम. D. आदरात् for उन्नमत्. A. उन्नमत्स्वमकाशशर°.

136. A. B. G. एवमेतत् before अहो which D. F. om. A. B. उद्भासते.

137. A. om. एवम् ... भासते. G. वत्स before एवम्. C. E. पल्लवोचित-

पुनर्विलोक्य सकौतुकम्। वत्स लक्ष्मण

पश्योदेति वियोगिनां दिनमणिः शृङ्गाररक्षामणिः
प्रौढानङ्गभुजङ्गमस्तकमणिश्चण्डीशचूडामणिः ।
तारामौक्तिकहारनायकमणिः कन्दर्पसीमन्तिनी-
काञ्चीमध्यमणिश्चकोरपरिषच्चिन्तामणिश्चन्द्रमाः ॥ ९९ ॥

138 लक्ष्मणः। एवमेतत् । अयमसौ

स्वैरं कैरवकोरकान्विदलयन्यूनां मनः खेदय-
न्नम्भोजानि निमीलयन्मृगदृशां मानं समुन्मूलयन् ।
ज्योत्स्नां कन्दलयन्दिशो धवलयन्नम्भोधिमुद्वेलय-
न्कोकानाकुलयंस्तमः कवलयन्निन्दुः समुज्जृम्भते ॥ १० ॥

139 विभी०। सखे सुग्रीव पश्य ।

मयूखनखरत्रुटत्तिमिरकुम्भिकुम्भस्थलो-
च्छलत्तरलतारकाप्रकरकीर्णमुक्तागणः ।
पुरन्दरहरिद्दरीकुहरगर्भसुप्तोत्थित-
स्तुषारकरकेसरी गगनकाननं गाहते ॥ ११ ॥

140 सुग्रीवः। सखे बिभीषण पश्य ।

यः श्रीखण्डतमालपत्रति दिशः प्राच्याः स्मरक्ष्मापतेः
पाण्डुच्छत्रति दन्तपत्रति वियल्लक्ष्मीकुरङ्गीदृशः ।

म्. A. B. G. घटना. A. D. F. om. सकौतुकम्. C. G. दीक्षा for रक्षा.

138. C. E. असौ हि. A. F. खेलयन् & C. E. दोलयन् for खेदयन्. F. G. समुन्मीलयन्. G. उद्वेलयन्वारिधीन्.

139. A. B. om. सखे. D. F. om. पश्य while A. adds one more. B. बहल for तरल. B. D. F. G. कपट for प्रकर.

140. A. C. E. add one more पश्य.

केलिश्वेतसहस्रपत्रति रतेः किंच क्षपायोषितः
क्रीडाराजतसीधुपात्रति शशी सोऽयं जगन्नेत्रति ॥ १२ ॥

141 रामः । निर्वर्ण्य ।

सितकिरणकपोलमालिमालोकयन्ती
मिहिरविरहतापव्याकुलां व्योमलक्ष्मीम् ।
रजनिरमलताराशीकरैः सिक्तमस्याः
परिमलयति गात्रं चन्द्रिकाचन्दनेन ॥ १३ ॥

पुनर्विमृश्य स्वगतम् ।

इन्दुरिन्दुरिति किं दुराशया
बिन्दुरेष पयसो विलोक्यते ।
नन्विदं विजयते मृगीदृशः
कोमलामलकपोलमाननम् ॥ १४ ॥

पुनः सीतां प्रत्यपवार्य ।

अस्य त्वद्वदनस्य विभ्रमलवं लावण्यवारांनिधे-
रिन्दुः सुन्दरि दुग्धसिन्धुलहरीबिन्दुः कथं विन्दतु ।
उत्कल्लोलय लोचने क्षणमयं शीतांशुरालम्बता-
मुन्मीलन्नवनीलनीरजवनीखेलन्मरालश्रियम् ॥ १५ ॥

---

141. B. G. °कपोलीम्. D. G. तिमिर for मिहिर. B. चन्द्रिकाचन्द्रिकेन. A. निर्वर्ण्य for विमृश्य. A. D. om. स्वगतम्. A. B. अये before इन्दुः. B. D. नन्वयम्. All except A. B. have श्यामकोमलकपोल &c. & तन्वि for अस्य. A. मुग्धसिन्धु. A. B. विन्दति. B. G. उत्कल्लोलविलोचने°

142 सीता । लज्जां नाटयति । विलोक्य सहर्षम् । अये कहं इमो उम्मीलिदो जेव्व

मुउलीकिदारविन्दो माणवईमाणवारणमइन्दो ।
तिहुअणणअणाणन्दो रअणीमुहचन्दणो चन्दो ॥ १६ ॥

143 रामः । सखे सुग्रीव पश्य ।

इन्दोरस्य त्रियामायुवतिकुचतटीचन्दनस्थासकस्य
व्योमश्रीचामरस्य त्रिपुरहरजटावल्लरीकोरकस्य ।
कन्दर्पक्षोणिपालस्फटिकमणिगृहस्यैतदाखण्डलाशा-
नासामुक्ताफलस्य स्थगयति जगतीं कोऽपि भासां विलासः ॥१७॥

144 सुग्रीवः । अये रघुनाथ पुनरुक्तमिदमाचेष्टते चन्द्रमसः किरणविलासः ।

145 रामः । कथमिव ।

146 सुग्रीवः । नन्वत एव ।

कर्पूरादपि कैरवादपि दलत्कुन्दादपि स्वर्णदी-
कल्लोलादपि केतकादपि चलत्कान्ताद्दगन्तादपि ।

---

142 अये कथमयमुन्मीलित एव

मुकुलीकृतारविन्दो मानवतीमानवारणमहेन्द्रः ।
त्रिभुवननयनानन्दो रजनीमुखचन्दनश्चन्द्रः ॥

---

142. C. E. G. अहो for अये. A. om. इमो. B. उम्मीलति. D. उम्मीलदु. B. जेव्वं & माणिणी. A. मत्त for माण. C. D. E. F. om. तिहुअण... णन्दो. B. G. अरविन्दो for आणन्दो. A. चन्द after मुह. C. D. E. F. चन्दो for चन्दणो.

143. A. B. G. repeat पश्य. A. C. E. व्योमल्ली.

144. A. om. अये for which C. E. अयि. A. B. om. इदम् for which C. E. अयम्. A. B. G. आचष्टे. A. विकास.

146. A. B. D. F. अमत एव. C.

दूरोन्मुक्तकलङ्कशङ्करशिरःशीतांशुखण्डादपि
श्वेताभिस्तव कीर्तिभिर्धवलिता सप्तार्णवा मेदिनी ॥ ६८ ॥

147 रामः । अलं तुच्छप्रायजल्पितेन ।

148 विभी॰ । देव तुच्छप्रायमेव जल्पितं सुग्रीवेण यदुक्तं मेदिनी धवलितेति । ननु त्रिलोकीतलमेव धवलितमिति वक्तव्यम् । संप्रति हि

समुन्नतघनस्तनस्तबकचुम्बितुम्बीफल-
क्वणन्मधुरवीणया विबुधलोकलोलभ्रुवा ।
त्वदीयमुपगीयते हरकिरीटकोटिस्फुर-
त्तुषारकरकन्दलीकिरणपूरगौरं यशः ॥ ६९ ॥

149 रामः । अयि लङ्केश्वर भवानपि किष्किन्धानाथमेवानुगतः । पुनर्विलोक्य सहर्षं सुग्रीवं प्रति ।

संरम्भोद्रिक्तनक्तंसमयदशमुखोच्चण्डदोर्दण्डहेला-
कैलासः सप्तलोकीजयमुदितमनोजन्मवादित्रशङ्खः ।
लोलाक्षीगण्डपालीलवणिमजलधेरुद्गतः फेनपिण्डः
पश्य व्योमावकाशं विशति विरहिणां दत्तशङ्कः शशाङ्कः ॥७०॥

निर्वर्ण्य स्वगतम् ।

अयं नेत्रादत्रेरजनि रजनीवल्लभ इति
भ्रमः कोऽयं प्रज्ञापरिचयपराचीनमनसाम् ।

D. E. F. put केतकात् in the first line & कैरवात् in the second.

147. F. अस्तु for अलम्. A. B. om. प्राय. D. अलं तुच्छायाः प्रजल्पितेन.

148. A. B. om. प्राय. D. om. एव. F. °प्रायजाल्पितम्. B. puts यदुक्तम् before जल्पितम्. A. B. त्रैलोक्यमेव. D. F. om. एव. C. E. मसृण for मधुर. D. G. वामभ्रुवा. A. तारगिरि for तुषारकर.

149. A. B. F. अये. A. B. G.

सुधानामाधारः स खलु रतिबिम्बाधरसुधा-
रसासेकासिक्तादजनि नयनात्पुष्पधनुषः ॥ ७१ ॥

150 लक्ष्मणः । आर्ये जानकि पश्य पश्य ।

आनन्दं कुमुदादीनामिन्दुः कन्दलयन्नयम् ।
लङ्घयत्यम्बराभोगं हनूमानिव सागरम् ॥ ७२ ॥

151 सीता । अये सुलक्खण लक्खण सो उण दाणिं कहिं रहुकुडुम्ब-संतावसमणचन्दणो पवणणन्दणो ।

152 लक्ष्मणः । आर्ये स रामचन्द्रेण बन्धुजनमानन्दयितुमयोध्यां प्रहितः ।

153 सीता । ता अम्हेहिं किंति विलम्बीअदि ।

154 रामः । बिभीषणमुखमालोकते ।

---

151 अये सुलक्षण लक्ष्मण स पुनरिदानीं कुत्र रघुकुटुम्बसंतापशमनचन्दनः पवन-नन्दनः ।

153 तदस्माभिः किमिति विलम्ब्यते ।

---

add मत after नाथ. A. सुग्रीवं प्रति सहर्षम्, & °सत्त्वः for नक्तम्. D. खण्ड for गण्ड. C. E. पुनर्निर्वर्ण्य F. स्वगतं निर्वर्ण्य & अये for अयम्. All except A. B. have पराधीन for पराचीन. A. °मनसः. A. B. G. सेकास्निग्धात्.

150. B. F. om. one पश्य.

151. F. om. सु. B. om. लक्खण. D. अये सुग्गीव लक्खण ण सो &c. F. कवि before रहु. D. G. रहुवल. D. संतावस्स मयण° (?).

152. D. अये. F. एव & D. G. एष after स. A. B. G. om. जन. B. G. आनन्दितुम्. G. अयोध्यायाम्.

153. C. D. E. F. om. ता. B. किंचि.

154. D. om. मुख. D. अवलोकायति & F. अवलोकय.

155 विभी० । निर्गत्य प्रविश्य च । देव इदं पुष्पकाभिधानं विमानरत्नमारुह्यताम् ।

सर्वे आरोहणं नाटयन्ति ।

156 रामः । सकौतुकम् । अये तदिदं विमानरत्नं यत्किल त्रिभुवनैकवीरः कुबेरानुजः कुबेरादाजहार ।

157 लक्ष्मणः । सामर्षम् । आर्य कथमयं किष्किन्धामाहिष्मतीपतिभ्यां समभागविभक्तवीरलक्ष्मीकोऽपि त्रिभुवनैकवीर इति व्यपदिश्यते ।

158 रामः । विहस्य । वत्स एवमेतत् ।

ताढकठोरभुजयन्त्रनिपीडनेन
निःशब्दतामुपगतैर्दशकण्ठकण्ठैः ।
यत्कीर्तिघोषणमकारि चतुःसमुद्र-
वेलासु किं स वचसां विषयः कपीन्द्रः ॥ ७३ ॥

अपि च ।

कोपप्रदीप्तनिजलोचनदीपपङ्क्ति-
निर्भिन्नसान्द्रतिमिरे स दशाननोऽपि ।

---

155. C. E. निर्गम्य. A. आवेश्य for प्रविश्य. All except A. B. om. देव. A. B. G. तत् after इदम्. A. °अभिधम् & om. रत्न B. G. विमानावरोहम् (G. °हणम्).

156. F. om. सकौतुकम्. A. D. F. om. कुबेरानुजः. C. E. कुबेराद्वाजहार त्रिभुवनैकवीरः कुबेरानुजः.

157. B. सहर्षम्. C. D. E. F. इव after सामर्षम्. All except A. B. om. आर्य. C. D. E. F. पुनः after कथम्. D. F. इदम् for अयम्. A. समसम. B. विभाग after भाग. D. F. G. om. वीर. B. om. एक.

158. A. B. om. वत्स. F. तथा हि after एतत्. B. भुजदण्ड. C. पी-

काराकुटीरकुहरे वसति स्म यस्य
सोऽप्येष हैहयपतिर्विषयो न वाचाम् ॥ ७४ ॥

किंतु परिभावय ।

यस्य द्राक्करवालकृत्तशिरसः कण्ठालवालस्थली
चूडाचन्द्रमसं निपीड्य निबिडं सिञ्चन्सुधानिर्झरैः ।
स्वां मेने शशिखण्डमण्डन इति ख्यातिं कृतार्थां हरः
पन्थानं दशकन्धरः स च कथंकारं गिरां गाहते ॥ ७५ ॥

निर्वर्ण्य । अये किमप्यस्य खलु त्रिकूटगिरिशिखरकण्ठीरवस्य दशकण्ठस्य लोकोत्तराणि चरितानि ।

यद्दोःशायिनि चन्द्रशेखरगिरौ भारावतारोन्नम-
न्नागाधीशफणावलीमणिरुचां पूरे समुन्मीलति ।
जातास्तुल्यमकालबालतपनाताम्राश्चतस्रो दिशो
देवस्यापि रुषा तुषारकिरणोत्तंसस्य तिस्रो दृशः ॥ ७६ ॥

159 लक्ष्मणः । आर्य

एष मे मनसि भासतेऽधुना
मूर्तिमानिव मनोरथो रथः ।
नास्ति नो यदधिरोहलीलया
दूरमागतवतामपि श्रमः ॥ ७७ ॥

डितेन. D. निःशङ्कताम्. A. सुवचसाम्. A. B. om. अपि च. B. D. दीप्र for दीप. D. G. वह्नि for पङ्क्ति. F. °तिमिरः स & D. °तिमिरस्य. B. अन्यच्च for किन्तु परिभावय which A. om. C. E. तत् & G. वरत् after परिभावय. D. F. °स्थली:. G. दृशखण्ड. B. कृतार्थः. C. E. गाहताम्. D. om. अये. C. E. F. अयि. A. B. किमुच्यते अथवा खल्वस्य, D. किमाव्यंते (?) वा खल्वस्य for our किमप्यस्य खलु out of which F. om. खलु. A. B. om. गिरि.

159. A. B. रथो मनोरथः.

160 रामः । एवमेतत् ।

उल्लङ्घ्य नीरधिमतीत्य च दण्डकानि
नद्यौ च मेकलकलिन्दसुते व्यतीत्य ।
प्राप्ताः शिखण्डिशतमण्डितशाखिखण्ड-
मेते वयं शिखरिणं ननु चित्रकूटम् ॥ ७८ ॥

161 सीता । तिर्यग्विलोक्य । अयि कलिन्दणन्दिणि सच्चप्पसादासि जं पुणोवि णिअकुडुम्बस्स दिण्णदंसणासि ।

162 रामः । अये तदिदं निर्मुक्तविरोधमधुरश्वापदं भगवतो भारद्वाजस्याश्रमपदम् ।

163 लक्ष्मणः । एवमेतत् । अत्र हि

व्याजृम्भमाणवदनस्य हरेः करेण
कर्षन्ति केसरसटाः कलभाः किलैके ।
अन्ये च केसरिकिशोरकपीतमुक्तं
दुग्धं मृगेन्द्रवनितास्तनजं पिबन्ति ॥ ७९ ॥

अपि च ।

क्रीडन्माणवकाङ्घ्रिताडनशतैरुज्जागरस्य क्षणं
शार्दूलस्य नखाङ्कुरेषु कुरुते कण्डूविनोदं मृगः ।

---

161 अयि कलिन्दनन्दिनि सत्यप्रसादासि यत्पुनरपि निजकुटुम्बस्य दत्तदर्शनासि ।

---

160. C. E. विलोक्य. B. G. तथा हि after एतत्. A. भुवौ for सुते. B. G. खण्डित for मण्डित. D. F. जात for खण्ड. A. B. किल for ननु.

161. G. अहह in place of अयि. A. B. add भअवदि after अयि. C. पुणोवि हि. C. E. दिण्ण for दिण्ण.

162. D. F. G. अयि. A. B. मुक्त & C. E. विमुक्त. D. F. G. om. मधुर. D. भरद्वाज. B. आश्रमम्.

163. C. E. om. लक्ष्मणः । एवमेतत्. A. B. तथा हि. E. उज्जृम्भ.° A. om.

चञ्चच्चन्द्रशिखण्डितुण्डघटनानिर्मोकनिर्मोचितः
किंचायं पिबति प्रसुप्तनकुलश्वासानिलं पन्नगः ॥ ८० ॥

164 रामः। अये कथमयं संप्राप्त एव चक्रवाकरमणीसंरम्भसमयः प्रभातसमयः। तथा हि

एते केतकधूलिधूसररुचः शीतद्युतेरंशवः
प्राप्ताः संप्रति पश्चिमस्य जलधेस्तीरं जराजर्जराः।
अप्येते विकसत्सरोरुहवनीढक्पातसंभाविताः
प्राचीरागमुदीरयन्ति तरणेस्तारुण्यभाजः कराः ॥ ८१ ॥

165 लक्ष्मणः। सकौतुकम्।

सद्यः संघटमानकोकमिथुनव्याजेन पीनस्तन-
द्वन्द्वव्यञ्जितयौवनोज्ज्वलरुचो निर्माय दिक्कन्यकाः।
दुर्दैवाक्षरमालिकामिव झटित्याकृष्य भृङ्गावलीं
लक्ष्मीमम्बुजिनीवनस्य तनुते देवस्त्विषामीश्वरः ॥ ८२ ॥

166 सुग्रीवः। बिभीषण पश्य पश्य।

उन्मीलन्ति निशानिशाचरवधूप्रोच्चाटनामान्त्रिकाः
सायंकालसुषुप्तपङ्कजवनप्रोद्बोधवैतालिकाः।

घवन & has कायम् for केसरसटाः. A. B. किलैते. A. मुग्धं मुनीन्द्र°. D. माणवकाण्ड. A. ताण्डवशतैः & अङ्कुरेण. C. D. E. F. चण्ड for चन्द्र.

164. C. E. रभसर & D. F. रभस for संरम्भ. B. F. om. प्रभातसमयः. D. प्रभातकसमयः. F. विकचत्. B. दृष्ट्या न for दृक्पात.

165. B. om. सकौतुकम्. A. °रुची. A. धिगिति & B. सगिति (?) for झटिति. A. अम्बुरुहाम्. All except A. B. have जन for वन. F. कुरुते for तनुते.

166. F. सखे बिभीषण. A. D. om. one पश्य. C. E. F. निर्वासना &

फुल्लत्पङ्कजकोशगर्भकुहरप्रोद्भूतभृङ्गावली-
झाङ्कारप्रणवोपदेशगुरवस्तीव्रद्युतेरंशवः ॥ ८३ ॥

167 विभी० । एवमेतत् । तथा हि

आयान्त्या दिवसश्रियः पदतलस्पर्शानुभावादिव
व्योमाशोकतरोर्नवीनकलिकागुच्छः समुज्जृम्भितः ।
आतन्वन्नवतंसविभ्रममसावाशाकुरङ्गीदृशा-
मुन्मीलत्तरुणप्रभाकरकरस्तोमः समुद्भासते ॥ ८४ ॥

168 रामः । प्रिये जानकि

एतत्तर्कय चक्रवाकसुदृशामाश्वासनादायिनः
प्रौढध्वान्तपयोधिमग्नजगतीदत्तावलम्बोत्सवाः ।
दीप्तांशोर्विकसन्ति दिङ्मृगदृशां काश्मीरपङ्कोदक-
व्यात्युक्षीचतुराः सरोरुहवनश्रीकेलिकाराः कराः ॥ ८५ ॥

अपवार्य । पश्य पश्य ।

शिथिलयति सरागो यावदर्को नलिन्याः
कमलमुकुलनीवीग्रन्थिमुद्रां करेण ।
प्रविकसदलिमालाकैतवात्तावदस्याः
स्फुटमुदयति काञ्चीमध्यनीलाश्मरश्मिः ॥ ८६ ॥

D. निष्क्रंदना for प्रोत्थादना. A. सायम्° & B. G. सालस° for कालसु°. A. B. G. झङ्कार.

167. A. B. पुञ्ज for गुच्छ. A. G. समुज्जृम्भते. A. B. अमृतांशु for अवतंस. A. B. D. समुज्जृम्भते.

168. D. F. G. om. जानकि. C. D. E. F. जगताम्. C. D. E. अपवार्य च. A. D. om. one पश्य. D. G. °मालागुञ्जितैर्मञ्जुशब्दा जनयति मुखसुखैः कामिनां कामिनीव.

169 सीता । विहस्य विलोक्य च । कहं इमो उम्मीलिदो जेव्व

पुव्वगिरिपम्मराओ पअडीकिदणअणसीअलसहाओ ।
कुङ्कुमाकिदङ्गराओ नलिणीवणवल्लहो देवो ॥ ८७ ॥

170 रामः । प्रकाशम् । अयि जानकि पश्य ।

तरलतरतरङ्गसङ्गरोला-
बहलविलासविलोलहंसमाला ।
अमरपुरतरङ्गिणीयमम्बा
सुरनरमङ्गलकारिणी न दूरे ॥ ८८ ॥

171 सीता । सहर्षं तदेव पठति तरलतरेत्यादि ।

172 रामः । सहर्षम् । वत्स लक्ष्मण इयमदूरे रघुकुलमङ्गलाङ्कुरप्ररोह-केदारधरणी तरङ्गिणी सरयूः । इयं च सरयूतरङ्गशीकरशीतलीकृतपरिसरा नगरीसीमन्तमणिरयोध्या ।

---

169 कथमयमुन्मीलित एव

पूर्वगिरिपद्मरागः प्रकटीकृतनयनशीतलस्वभावः ।
कुङ्कुमकृताङ्गरागो नलिनीवनवल्लभो देवः ।

---

169. C. D. E. F. om. विहस्य & च. A. अये कहं. B. उम्मीलदि & D. उम्मीलदु. E. °कोसवलहासो for सीअलसहाओ. F. हासो for सहाओ. D. कुङ्कुमअभङ्ग°. All except A. B. जण for वण.

170. A. B. G. अये. C. E. repeat पश्य. B. रङ्ग & C. E. F. G. भङ्ग for सङ्ग. All except A. read हेला for रोला.

171. F. om. सहर्षम्. A. °तरलतरङ्गेत्यादि for °तरेत्यादि which all others except B. om. A. adds समसंस्कृतप्राकृतं च & C. D. E. F. G. संस्कृतं प्राकृतं च.

172. A. om. सहर्षम्. C. D. E. repeat इयम्. In place of अदूरे C. E. have मयारूढा & D. F. अयारूढा. A. स्वकुल. C. D. E. F. प्ररोहधारिणी & शिशिरीकृत. B. C. E. F. सीमान्तिनी.

173 लक्ष्मणः। सहर्षम्। अयमसौ भरतानुयातस्त्वदभिषेकाय कृतमतिर्भगवानरुन्धतीपतिः।

दिलीपकुलमाणिक्यं सकलाशाप्रकाशकम्।
आविर्भवन्तं भास्वन्तं भवन्तं च प्रतीक्षते ॥ ८९ ॥

तेन पुष्पकादवतरामः।

174 रामः। वत्स प्रतीक्षस्व। इहैव तावत्सुलभसकलमण्डलालोकमाखण्डलाशामण्डनं भगवन्तं चण्डमरीचिं नमस्यामः। अञ्जलिं बद्ध्वा।

प्राचीमुखैकतिलकं पूर्वाचलशेखरैकमाणिक्यम्।
त्रिभुवनगृहैकदीपं वन्दे लोकैकलोचनं देवम् ॥ ९० ॥

175 नेपथ्ये। अयि वत्स रामभद्र।

176 रामः। अहो अद्भुतम्।

विकासयन्ती नितरां पद्मानीव मनांसि नः।
प्रभेव भारती कापि भानुबिम्बाद्विजृम्भते ॥ ९१ ॥

---

173. D. om. सहर्षम्. D. भरतोऽनुगतः. A. D. G. अभिषेककृत. A. B. G. विकाशकम्. F. om. च & A. G. सम् for it. D. reads the second line thus:—आविर्भवन्तं भवतं भास्करं च प्रतीक्ष्यतः. C. D. E. F. तेन च. A. अवततार. C. E. F. इति after अवतरामः.

174. C. D. E. F. om. एव. A. सुललित for सुलभ. A. B. मण्डल (B. लम्) लोकम्. C. D. E. F. लोकाखण्डल. A. B. G. कुङ्कुम for मुखैक & रोहण for शेखर. A. B. त्रैलोक्यभवनदीपम्. A. B. वन्देमहि (B. अहम्) कमलिनीनाथम्.

175. A. B. G. अये. D. om. वत्स.

176. C. om. रामः for which E. रामभद्रः. A. B. पद्मिनीव. A. भास्वतीयम् for भानुबिम्बात्. C. D. E. F. विराजते.

177 नेपथ्ये ।

यशःपूरं दूरं तनु सुतनुनेत्रोत्पलवनी-
तमस्तन्द्राचन्द्रातप तप सहस्राणि शरदाम् ।
इयं चास्तां युष्मच्छरशमितलङ्केश्वरशिरः-
श्रितोत्सङ्गा नन्दत्सुरनरभुजङ्गा त्रिजगती ॥ ९२ ॥

178 रामः । अनुगृहीतोऽस्मि ।

179 पुनर्नेपथ्ये । अन्यच्च ते किमाशास्महे ।

180 सुग्रीवः । अये तात दिनकर परिपूर्णमनोरथ एव रामभद्रः ।
अनेन हि

प्राप्ता निर्भरमुन्नतिर्निजगुणैराज्ञा पितुः पालिता
सुग्रीवश्च विभीषणश्च परमां राज्यश्रियं प्रापितौ ।
संग्रामे दशकन्धरः सुररिपुर्नीतो यशःशेषतां
दृष्टो बन्धुजनश्च हर्षविगलद्बाष्पोल्लसल्लोचनः ॥ ९३ ॥

तथापीदमस्तु ।

आबाल्याद्वदनाम्बुजे तनुभृतां सारस्वतं जृम्भतां
देवे कौस्तुभधाम्नि चन्द्रमुकुटाद्वैता मतिः खेलतु ।

---

177. B. सुतनु तनु. D. नीलोत्पल. B. वनी for वनी. D. °तप न for °तप तप. All except B. read गुणकथनपीयूषपटल for शर... शिरः. D. श्रितोत्सङ्गा. B. °आनन्दा & D. तुष्यत् for नन्दत्.

178. A. om. रामः.

179. A. B. om. च. D. इति & F. तत् for ते. B. कम्. A. B. अपि before आशा°.

180. C. D. E. F. अयि. D. om. परि.° C. D. E. F. °रथश्च रामः. A. om. हि. D. स for च. A. om. हर्षविगलत्. A. B. add भरतवाक्यम्

वाग्देव्या सह मुक्तवैशसरसा देवी च दीव्यादियं
शेषस्येव फणाब्जेषु सततं लक्ष्मीः सतां सद्मसु ॥ ९४ ॥

181 रामः। तदागच्छत। पुष्पकादवतीर्य गुरुं बन्धुजनं पौरांश्चानन्दयामः।

इति पुष्पकादवतरणमभिनाटयन्तः सर्वे निष्क्रान्ताः।

इति सप्तमोऽङ्कः समाप्तः।

समाप्तमिदं प्रसन्नराघवं नाम नाटकम्।

---

after अस्तु. D. G. आबालात्. A. B. मुकुटे भीतिः & G. °मुकुटेऽद्वैता. A. विद्याविद्यम् & D. दिष्टं दिवम् for दीव्यादियम्. C. E. F. वसुमती, A. °भुजगताम्. B. °षु जगती, & D. भगवती for °षु सततम्. D. पद्मेषु for सद्मसु.

181. A. आगच्छत. B. आगच्छतु. A. B. D. (A. निज) गुरु (D. पुर for it) बन्धुपौरजनमानन्दयामः (D. वः) F. गुरुबन्धुजनं पौरांश्च नन्दयामः. D. पुष्पकाव°. A. अवतरम्. F. संवृत्तम् & B. C. D. E. अभिनवृत्तम् for अभिनटयन्तः. G. इति सर्वे पुष्पकादवतरन्ति. For our सर्वे निष्क्रान्ताः, which is the reading of A., C. E. F. have इति निष्क्रान्ताः सर्वे, which is also the reading of B. D. G., but the latter put the words after and the former before the verse, जायन्तामविरामरामचरितक्रीडाभिरामाः सता (D. मा) मन्भीलत्नवमल्लिका (B. G. मालिका) विरचितस्रग्दाम (D. भार) रम्या गिरः। याः कण्ठे (D. काले) नि (G. अपि) निविश्य पेशलधियो रोमाञ्चली (B. °वली) लाञ्छि (D. ङ्कि) ताः कान्ताबाहुलताविलाससमहिमाश्लेषांस्तृणं मन्व (F. न्य) ते (D. °श्लेषार्पणं तन्वते); A. omits this verse.

NOTES.



ACT I.

